First Edition 1966

Copies may be had from :

THE AUTHOR

Printed by :

PANDIT K. N. VARADARAJA IYENGAR

Sree Kantha Power Press, Mysore

॥ श्रीः ॥

॥ श्री लक्ष्मीहयवदन परब्रह्मणे नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमते निगमान्तमहागुरवे नमः ॥

'पण्डितरत्नं', 'पण्डितभूषणम्', 'मीमांसावेदान्तविद्वान्', 'मीमांसकशिरोमणि', 'मीमांसाभूषणम्', 'मीमांसाविशारद' इत्यादि नानाबिरुदमेदुरेण मैसूरु श्रीमन्महाराजसंस्कृतमहापाठशालायां मीमांसाशास्त्रप्राध्यापकेन

श्री ई-श-वरदाचार्येण विरचितः

शास्त्रालोकः

1966

रू. 4=00

॥ श्रीमते हयग्रीवाय नमः ॥

अज्ञानध्वान्तहर्तारं आश्रितानां शुभप्रदम् ।
त्रयीरक्षणदक्षं तं तुरगास्यं हरिं भजे ॥

अयि पण्डितप्रवराः, आस्तिकमार्गरक्षणबद्धादराश्च-निखिलपुमर्थसाधनप्रतिपादकस्य स्वतः प्रमाणभूतस्य दोषसंस्पर्शविधुरस्यवेदस्य द्वौ भागौ दरीदृश्येते । तत्रोत्तरभागार्थनिर्णयोद्देशेन प्रवृत्ता ब्रह्ममीमांसा, पूर्वभागार्थविवरणार्थं च प्रवृत्ता पूर्वमीमांसा । या खलु सर्वशास्त्रमूलभूता सर्वैरुपादेया । मोक्षार्थिभिरपि चित्तनैर्मल्यसंपादनाय क्रत्वनुष्ठानं अपेक्षितमिति तन्निर्णयौपयिकी मीमांसा सुतरामुपजीव्या । कामिनां तु कर्मानुष्ठानं नितरामेतच्छास्त्रजन्यज्ञानाधीनमिति न अधिकतया वक्तव्यम् अत एव प्रथमापेक्षितत्वात् भगवान् जैमिनिः 'अथातो धर्मजिज्ञासे' त्यारभ्य द्वादशाभिरध्यायैः धर्ममेव विस्तरेण प्रतिपादयामास । एतेषां च जैमिनिसूत्राणां, शबरस्वामिविरचितं, शाबरभाष्यं, तस्य च, श्रीकुमारिल भट्टविरचितवार्तिकादिकं समुल्लसति । परंतु प्रविविक्षूणां विद्यार्थिनां, एवं पण्डितानां च कृते, पूर्वमीमांसाशास्त्रसंमत प्रमाणप्रमेयस्वरूपपरिचायकस्य कस्यचित् प्रकरणग्रन्थस्य अनुपलब्धिं पर्यालोच्य 'शास्त्रालोक' नामकोयं प्रबन्धः श्लोकवार्तिक शास्त्रदीपिकामानमेयोदयादिग्रन्थानुसृत्य सरलया शैल्या आरचितः शास्त्रार्थप्रकाशकुतूहलिना मया । तत्र मनुष्यमात्रसाधारणान् दोषान् संभावितान् दूरीकृत्य गुणभागेन संतुष्य विद्वत्स्तोमः मामनुगृह्णातु इति प्रार्थयिता ।

'पण्डितरत्नम्' ई-श-वरदाचार्यः
मीमांसाशास्त्र प्राध्यापकः, ग्रन्थकारः

९-३-६६.

विषयानुक्रमणिका

नं	विषयः		पुटे

|| अभिषेक उपाध्याय ||

॥ श्रीः ॥

॥ श्रीमते लक्ष्मीहयवदनाय नमः ॥

॥ शास्त्रालोकः ॥

प्रथमः प्रसरः

लक्ष्मीर्यस्य हि वाममूरुमभजद्यः पुण्डरीके स्थितः
नाभिं यस्य चतुर्मुखस्समभजद्योरक्षति स त्रयीम् ।
सन्तो यस्य पदारविन्दभजनाद्विन्दन्ति मुक्तिं शुभां
तं वन्देऽखिलकर्मराध्यमनिशं वाहास्यमीहान्वितः ॥

वेदस्सर्वपुमर्थसाधननिधिः तस्यार्थसुज्ञप्तये
तन्त्रं ख्यातमथाकरोत् स भगवान् जैमिन्यभिख्योमुनिः ।
तस्मिन् वेदविचारणेन महिते गत्यर्थमत्यादरात्
शास्त्रालोकमथातनोति वरदाचार्यस्सतांसंमतम् ॥

वाञ्छा ह्रीयं लोके सर्वेषां जनिमतां यथा इष्टप्राप्तिर्मे भूयात् अनिष्टपरिहारश्चेति । प्रादुर्बभूवुश्च सर्वाण्यपि शास्त्राणि तदुपायबोधनार्थम् । वरीवर्ति च तेषु सर्वोत्कृष्टतया सकललोकवन्द्यः, अपौरुषेयतया निर्दुष्टः, महनीयः वेद एव हि निरुपमं मुख्यं शास्त्रमिति । स्मृतं चैतस्य वेदस्य धर्ममूलत्वं महर्षिभिः 'वेदोऽखिलो धर्ममूल' मित्यादिना । न ज्ञायते चायं वेदः मन्दमतिभिः यथावदर्थबोधकत्वेनेति भगवान् जैमिनिः वेदार्थनिर्णयार्थं प्रणिनाय द्वादशलक्षणीम् । या च विचाररूपत्वेन मीमांसाशास्त्रमिति महतीं प्रथामश्नुते। आद्रियते च या सर्वैपि तीर्थकरैः स्वस्वसिद्धान्तस्थापनार्थं महत्या श्रद्धया । जैमिनिसूत्रणां चैतेषां संक्षिप्तार्थतया नैके वृत्तिकाराः भाष्यकाराश्च स्वस्ववृत्तिभिः भाष्यैश्च सूत्राण्येतानि विवव्रिरे । तत्रचाद्योपलभ्यमानं अतिगंभीरं, रमणीयया

सर्वमनोहारिण्या शैल्या सकलेतरभाष्यकाराङ्गीकृतं आचार्यशबरस्वामि विरचितं शाबरभाष्यमिति प्रथितं कुमारिलभट्टप्रभाकराभ्यां विरचित टीकोपेतं दरीदृश्यते। तत्र कुमारिलभट्टग्रन्थानामेव हि व्यवहारे 'भट्टनयः' इति महती प्रसिद्धिः परिदृश्यते। नैवं प्रभाकरग्रन्थानाम्। अतः भट्ट समयस्यैव प्रचुरत्वान् तन्मतानुसारेण प्रमाणप्रमेयादिनिरूपणमत्र कुर्मः। तत्रापि प्रमाणाधीनत्वात् प्रमेयसिद्धेः प्रमाणनिरूपणमेव हि प्रथमकर्तव्यं भवति ।

प्रमाणं नाम प्रमां प्रतिकरणम्। प्रमा च अज्ञाततत्वार्थविषयकज्ञानम्। अत्रचाज्ञातपदेन स्मृतेः अनुवादस्य च ज्ञातविषयकत्वात् प्रमात्वव्युदासः।

केचित्तु तार्किकाः स्मृतेः परं प्रामाण्यं नास्ति, अनुवादस्य तु प्रामाण्यं वर्तत एवेत्यभिप्रयन्ति। तच्चेदमयुक्तम्। अनुवादो हि न पूर्वज्ञानात् अतिशयं कंचन अर्थपरिच्छेदे व्यवहारे वा आधत्ते। अतः फलविशेषस्यादर्शनात् फलार्थमेव च प्रमाणानां स्वीकरणात् स्मृतिवदेवानुवादस्याप्रामाण्यमेव हि युक्तम्। न चैवं 'स्तंभोयंस्तंभोय' इति धारावगाहि ज्ञानेषु द्वितीयादिज्ञानस्य प्रमात्वं न स्यात् अज्ञातावगमकत्वाभावात् इति वाच्यम्। तत्रापि 'अयं अयं' इति उत्तरोत्तरेषां कालांशानां अज्ञातानामवगमात्, उत्तरस्मिन् क्षणे घटादिसद्भावस्य च पूर्वज्ञानेनानवगमात्। अतः प्रमालक्षणे अज्ञातपदेन स्मृत्यादि प्रमात्वव्यावृत्तिर्युक्तैव। तत्त्वपदेन भ्रमसंशयादीनामयथार्थज्ञानानां प्रमात्वनिरासः। अतश्च अज्ञाततत्त्वागमः प्रमेतिसिद्धे तस्याः करणत्वेन इंद्रियसन्निकर्षादीनां प्रमाणत्वम्।

तार्किकास्तु—प्रमाकरणं प्रमाणम्। यथार्थानुभवः प्रमा। अनुभवश्च स्मृतिभिन्नं ज्ञानमिति वर्णयन्ति। तदपीदमयुक्तम्। अनुवादस्य सपद्येव पूर्वमप्रमात्वस्य स्थापनात् तद्व्यावर्तकपदस्यचात्राभावादतिव्याप्तेः।

प्राभाकराः—अनुभूतिः प्रमाणम्। स्मृतिव्यतिरिक्तसंविच्चानुभूतिः इति वदन्ति। इदमपि न चतुरश्रम्। भ्रमादेः स्मृतिव्यति

रिक्तत्वेन तेष्वतिव्याप्तेः एवमव्याप्तिश्च बोध्या, तथा हि प्रभाकरमते सर्वे ज्ञानेष्वपि आत्मा ज्ञानस्वरूपं विषयः इति त्रितयमपि प्रकाशते। सर्वत्रचात्मस्वात्मांशयोः प्रमाणत्वं प्रत्यक्षत्वमप्यस्तीति हि स्वीक्रियते। एवं च स्मृतिभिन्नज्ञानस्यैव प्रमाणत्वे स्मृतेरात्मस्वात्मांशयोरप्रमाणत्वं स्यादिति (अव्याप्तिः)।

बौद्धाश्च विज्ञानं यदविसंवादि तत्प्रमाणम्। अविसंवादित्वं नाम अर्थक्रियाकारित्वं इति वदन्ति। तदपि न शोभते। भूतभविष्यद्विषयस्यानुमानस्य अर्थक्रियाकारित्वाभावेनाव्याप्तेः। स्मृतेरपि कदाचिदर्थक्रियाकारित्वेन प्रामाण्यं स्यादित्यतिव्याप्तिश्च। अतः अज्ञाततत्त्वार्थज्ञानमेवप्रमा। तत्साधनमेव च प्रमाणमित्येतातावता सिद्धम्। तानि च प्रमाणानि-प्रत्यक्ष--अनुमान--उपमान--शब्द--अर्थापत्ति-अनुपलब्धिभेदेन षड्विधानि इति व्यक्तमाकरे।

॥ प्रत्यक्षनिरूपणम् ॥

तत्र प्रत्यक्षं नाम इन्द्रियार्थसन्निकर्षजन्यं ज्ञानम्। इन्द्रियाणि च चक्षूरसनश्रोत्रघ्राणस्पर्शनमनांसीति षड्विधानि। तेषां स्थानानि प्राचीनैः एवं परिगणितानि—

चक्षुर्नाम कनीनिकान्तरगतं तेजोऽथ जिह्वाग्रग
स्तोयांशो रसनं क्षितेरवयवो घ्राणं च घोणोदरे।
सर्वाङ्गप्रसृताश्च मारुतलवास्त्वङ्नाम कर्णोदर
व्योमैव श्रवणं मनस्तु विभु तद्देहे च कार्यावहम् ॥ इति—

लोके च कार्यसामान्यस्य केनचित्कारणेन जन्यत्वस्य दृष्टत्वात् रूपज्ञानस्यापि कार्यस्य केनचित् कारणेन भवितव्यमिति सामान्यतः सिद्धौ प्रपञ्चे दीपादितेजस एव रूपज्ञानं प्रतिकारणत्वमिति दर्शनेन रूपज्ञानसाधनं चक्षुरपि तैजसमिति सिध्यति। एवं रसज्ञान

रसनमपि जलस्यैव शुष्कवस्तुषु रसव्यंजकत्वदर्शनात् जलीयमिति बोध्यम्। तथा घ्राणमपि गन्धग्राहकं पार्थिवनिम्बत्वगनुलेपनस्य चन्दन गन्धाभिव्यंजकत्वदर्शनात् पार्थिवमिति विभावनीयम्। व्यजनपवनस्य अङ्गसङ्गतसलिलगतशैत्यस्पर्शाभिव्यंजकत्वदर्शनात् स्पर्शोपलंभकस्य त्वगिन्द्रियस्य वायवीयत्वम्। एवं च परिशेषात् शब्दग्राहकस्यश्रोत्रस्य आकाशात्मकत्वमिति सिध्यति। न च पृथिव्यादिभूतचतुष्टयान्यतमा त्मकत्वमेव श्रोत्रेन्द्रियस्य किं न स्यादिति वाच्यम्। श्रोत्रं अन्येन्द्रियारंभ केणारब्धं न भवति इन्द्रियत्वात् इत्यनुमानेन तद्बाधात्। माभूत्तर्हि भूतात्मकत्वमेव श्रोत्रस्येतिचेन्न, श्रोत्रं भूतात्मकमेव बहिरिन्द्रियत्वात् चक्षुरादिवत् इत्यनुमानस्यैव तत्र प्रमाणत्वात्। तार्किकाश्च शब्दस्य आकाश गुणत्वात् तद्ग्राहकस्य श्रोत्रस्यापि आकाशात्मत्वमिति वर्णयन्ति तत् शब्दस्य गुणत्वासिद्धेरयुक्तम्। शब्दस्य गुणत्वासिद्धिश्च वार्तिके तद्भूषणे चास्माभिर्विस्तरेण प्रपञ्चितेति (शब्दनित्यत्वाधिकरणे) नात्रनिरूप्यते।

मनस्तु सुखदुःखाद्यपरोक्षज्ञानकारणत्वेन परिकल्प्यमानं विभु इति च सिद्धान्तः। विभुत्वेऽपि शरीरावच्छिन्नस्यैव तस्येन्द्रियत्वमिति तत् तत्प्रदेश एव कार्याणि करोति। रूपादिज्ञानेष्वपि तन्मनः चक्षुरादिसापेक्षं प्रवर्तते। (अनुमानादिष्वपि लिङ्गादिसहायं तत्प्रवर्तत इति वस्तुस्थितिः)। चक्षुरादीन्यनुद्भूतरूपस्पर्शादीनि इति प्रत्यक्षेण न गृह्यन्ते।

इन्द्रियैर्ज्ञानात्मके कार्ये जननीये व्यापारभूतस्सन्निकर्षस्तु द्वि- विधः संयोगः संयुक्ततादात्म्यं चेति। तत्र पृथिव्यप्तेजसां नेत्रत्वगिन्द्रि याभ्यां संयोगात् ग्रहणम्। वायोस्त्वक्संयोगात्। दिङ्नभस्तमसां चक्षुस्संयोगात्, शब्दरूपद्रव्यस्य तु श्रोत्रसंयोगात्, आमनो मनस्सं- योगात्, कालस्य तु सर्वैरपीन्द्रियैः संयोगात्।

चक्षुरादिसंयुक्तपूर्वोक्तपृथिव्यादिगतानां जातिगुणकर्मणां ग्रहणं संयुक्ततादात्म्यात्। उक्तंचाकरे.

रूपादीनां तु संयुक्तद्रव्यतादात्म्यमेव नः ।
प्रतीतिकारणं तस्मात् न संबन्धान्तरस्पृहा ॥

इति । न च जातिगुणकर्मगतानां सत्तारूपत्वकर्मत्वादीनां ग्रहणाय अन्येऽपि सन्निकर्षा स्वीकार्या एवेति वाच्यम्। तेषामपि साक्षात्तादात्म्याभावेऽपि परंपरया तादात्म्यसंभवेन संयुक्ततादात्म्येनैव निर्वाहात् । अथ परंपरया निर्वाहे एकेनैव सन्निकर्षेणालमिति चेदस्तु तर्हि रूपत्वकर्मत्वादीनां ग्रहणाय परेषां संयुक्तसमवेतसमवायवत् अस्माकमपि संयुक्ततादात्म्यतादात्म्यं नाम तृतीयः सन्निकर्षः । अतश्च द्वेधा त्रेधा वा सन्निकर्षः, नाधिकः ।

तार्किकास्तु तादात्म्यस्थाने अप्रसिद्धमनुपपन्नं समवायं कल्पयन्तः सन्निकर्षषाड्विध्यं दर्शयामासुः—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । तैश्च, द्रव्य, गुण, गुणत्व, शब्द, शब्दत्व अभावसमवायानां क्रमेण ग्रहणमिति च वदन्ति ।

तदिदं असारम्। आद्यसन्निकर्षत्रयं तावत् मीमांसकोक्तसन्निकर्षेषु नामान्तरमात्रदानेनख्यातिसंपादनमिति चौर्यपाटवप्रदर्शनपरम्। शब्दस्य च श्रोत्रगुणत्वाभावादेव, चतुर्थपञ्चमसन्निकर्षयोरयुक्तत्वम् । शब्दश्च द्रव्यमेव न गुणः इति वार्तिके अत्रैवोत्तरत्रचाभिव्यक्तं भविष्यति । अभावस्य चाप्रत्यक्षत्वात् समवायस्य च गगनकुसुमसहोदरत्वात् विशेषणविशेष्यभावाख्यान्तिमसन्निकर्षोऽपि निकर्षावह एव भवति । इदमप्यत्र विभावनीयं, लोके 'दण्डी पुरुषः' इत्यादौ संबन्धान्तरपूर्वक एव विशेष्यविशेषणभावो दृश्यत इति अभावसमवाययोश्च अर्थेन सह संबन्धान्तराभावात् कथं चक्षुःसंयुक्तेनार्थेन अभावसमवाययोर्विशेषणविशेष्यभाव इति । अतः तार्किकमतमयुक्तम् ।

प्राभाकराश्च, रूपत्वादीनाममभावात् संयुक्तसमवेतसमवायस्य, शब्दत्वाभावात् समवेतसमवायस्य, अभावाभावात्, समवायस्य प्रत्यक्षत्वाभावाच्च विशेषणविशेष्यभावस्य च नावश्यकतेति, संयोगः, संयुक्तसमवायः समवायः, इति त्रय एव सन्निकर्षा इति प्राहुः—तदपि रूपत्वादीनां साधनात् तार्किकैरेव निराकृतम्। अतः उक्त एव प्रकारःश्रेयान्।

'प्रत्यक्षं चेदं द्विविधं, निर्विकल्पकं सविकल्पकंचेति। इन्द्रियसन्निकर्षसमनन्तरमेव वस्तुस्वरूपमात्रावगाहि शब्दानुगमरहितं च यत् संमुग्ध ज्ञानं जायते तस्य विशिष्टकल्पनाभावात् निर्विकल्पकत्वेन व्यवहारः। यत्तु तदनु शब्दस्मरणसहकृतं जात्यादिविशिष्टवस्तुविषयकं ज्ञानं तदुच्यते सविकल्पकमिति।'

वैयाकरणाश्च निर्विकल्पकं नैव स्वीकुर्वन्ति। उक्तं च वाक्यपदीये 'न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते' इति। तदिदमप्ययुक्तम्। प्रथमतः अर्थदर्शनाभावे शब्दस्मरणस्य निर्हेतुकत्वप्रसंगात्।

बौद्धाश्च—निर्विकल्पकमेकमेव प्रत्यक्षं प्रमाणं च, सविकल्पकं तु न प्रत्यक्षं प्रमाणं चेत्याहुः—इदमपि न चारु—सविकल्पकस्य प्रत्यक्षत्वेन लोकसिद्धस्य निषेधे लोकविरोधस्यापरिहारात्।

उक्तं च भट्टपादैः—

चन्द्रशब्दाभिधेयत्वं शशिनो यो निषेधति।
स एव सविकल्पस्य प्रत्यक्षत्वं निवारयेत्॥ इति

बौद्धमते अर्थक्रियाकारित्वलक्षणं प्रमाणत्वं, सविकल्पानन्तरमेवार्थक्रियादर्शनात् सविकल्पस्यैवेति तस्य प्रमाणत्वं दुर्निवारम्। ननु सविकल्पस्य साक्षादिन्द्रियजन्यत्वं नास्ति निर्विकल्पेन व्यवधानात्। अतः कथमस्य प्रत्यक्षतेति। यदि परंपरया अक्षजन्यस्यापि प्रत्यक्षत्वं तर्हि अनुमानादीनामपि प्रत्यक्षता दुर्निवारेति चेत्—ब्रूमः, साक्षात् परंपरया

वा अक्षजन्यत्वमात्रेण प्रत्यक्षत्वोपपत्तेः अनुमानादिष्वतिप्रसक्तेश्च पङ्क-जादि शब्देष्विव प्रत्यक्षशब्दस्य योगरूढिस्वीकारादेव वारणात्। उद्भि-दधिकरणे खण्डदेवोक्तरीत्यनुसारे तु प्राचीनप्रयोगाभावादेव अतिव्याप्ते-रभावात्। अतः निर्विकल्पसविकल्पयोरेव प्रत्यक्षशब्दवाच्यत्वं नाक्ष-जत्वेऽप्यनुमानादीनामिति सिद्धम्। सविकल्पके च द्रव्यजातिगुणकर्म नामभिः पञ्चधा विकल्पो भवति। यथा घटवद्भूतलम्, इति द्रव्येण, ब्राह्मणोऽयं इति जात्या, श्यामोऽयं इति गुणेन, गायत्ययं इति क्रियया, गोविन्दोऽयं इति नाम्ना। प्रत्यभिज्ञाप्रत्यक्षमपि नामकल्पनायामेवान्त-र्भवति यतः अतः षष्ठो विकल्पस्स इति केषांचित् पक्षो न युक्तः। प्रत्य-भिज्ञाच संस्कारसहितेन्द्रियेण एकज्ञानत्वेन जायते। तया च प्रत्यभि-ज्ञया स इति अयमिति च द्वे भाने जायेते। तत्र स इति भानजननशक्तिः प्रत्यभिज्ञायाः संस्काराहिता। अयमिति भानजननसामर्थ्यंचेन्द्रियकृत-मिति बोध्यम्।

त्रिपुटीप्रत्यक्षवादिनस्तु प्राभाकराः—साक्षात्प्रतीतिः प्रत्यक्षम्। तच्च मेयमातृप्रमासुचेति त्रिपुटं भवतीत्याहुः

इदमत्र वक्तव्यं—किमिदं साक्षात्त्वं नामेति। किमत्र वक्तव्यं? साक्षाद्धीः स्वरूपधीः अक्षादेवहि स्वेनैव रूपेण भानं भवति। लिङ्गादि-भ्यस्तु अन्यसंबन्धिरूपेणैव वह्न्यादीनां भानात् न साक्षाद्भानं वर्तते इति चेत् तर्हि प्रत्यक्षत्वेनाभिमते सविकल्पकेऽपि नामादिपरसंबन्धित्वेनैव भानात् प्रत्यक्षत्वं न स्यात्। ननु सविकल्पके नामादिविषये परसंबन्धि रूपभाने सत्यपि स्वरूपधीरपि वर्तत एवेति चेत् अनुमानादिष्वपि तस्य सत्वान् तेषामप्यक्षजत्वं स्यात्। अतः कथं प्रत्यक्षानुमानयोर्भेदः इति। अतः प्रभाकरोक्तमयुक्तम्।

बौद्धाश्च 'कल्पनापोढमभ्रान्तं प्रत्यक्षमिति। कल्पनापोढपदेन सविकल्पकस्य प्रत्यक्षत्वनिरासः। अतः निर्विकल्पकमेकमेव प्रत्यक्षम्।

अभ्रान्तपदेन निर्विकल्पकेऽपि भ्रान्तिरूपे प्रत्यक्षत्वनिरासः इति च प्राहुः—तदपि न चतुरश्रम् । लोकानुरोधेनैवार्थसिद्धेराश्रयणीयत्वात् लोके च सविकल्पकप्रत्यक्षस्य प्रमात्वसिद्धेरव्यासम् ।

केचित्तु (तार्किकैकदेशिनः) भूतभविष्यद्विषयं योगिज्ञानं ईश्वर ज्ञानं च इन्द्रियसंनिकर्षजत्वाभावेप्यपरोक्षमस्तीति तेषामपि संग्रहाय अपरोक्षप्रमाव्याप्तं प्रत्यक्षमिति लक्षयितव्यमित्याहुः—तदपि, प्रत्यक्षस्य विद्यमानोपलंभनत्वनियमात् भूतादीनां प्रत्यक्षत्वानुपपत्तेरयुक्तमेव। अतः 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्ष' मिति सूत्रानुसारि पूर्वोक्तमस्मदीयलक्षणमेव युक्तम्—

इति शास्त्रालोके प्रथमः प्रसरः

॥ अथ द्वितीयः प्रसरः ॥

॥ अनुमाननिरूपणम् ॥

'अनुमानं ज्ञातसंबन्धस्य एकदेशदर्शनात् एकदेशान्तरे असन्निकृष्टेऽर्थेबुद्धिः' इति भाष्यम् (शाबरम्) व्याप्यस्यधूमादेर्दर्शनात् असन्निकृष्टवह्न्यादेः ज्ञानमनुमानमिति हि तदर्थः । (तथा च पर्वतादौ धूमादिमत्त्वदर्शनात् अग्न्याविशिष्टत्वज्ञानं इति सिद्धम्)। ननु किमिदमत्र धूमादेर्व्याप्यत्वंनामेति तु निरूपणीयमितिचेत्श्रृणु: यदतन्तरायन्नवर्तते तत्तस्य व्याप्यम्, यथा धूमो हि अग्निमन्तरा न वर्तत इति धूमस्य व्याप्यता। अग्निस्तु धूममन्तराऽपि परिदृष्ट इति धूमाद्बहिरपि वर्तमान त्वात् व्यापकः इति तस्य व्यापकतैव। एवं च अग्निधूमयोः परस्पर व्याप्त्यभावात् विषमव्याप्तिरित्युच्यते। कृतकत्वानित्यत्वयोः समव्याप्तिः यतश्च कृतकानां समेषामनित्यत्वं, अनित्यानां च सर्वेषां कृतकतेति नियमः परिदृष्टः। अतस्तत्रसमव्याप्तिरेव। काचेयंव्याप्तिरितिचेत् उच्यते

अनौपाधिकः (स्वाभाविकः) संबन्धो व्याप्तिः। अनौपाधिकत्वं चोपाधिरहितत्वम्। उपाधिर्नाम साध्यं प्रति साक्षात्प्रयोजकीभूतं प्रकृतहेतोः हेत्वन्तरमभिधीयते। तस्योपलंभे च तत्प्रयुक्तमेव प्रकृतसाध्यसंबन्धं क्वचित्प्राप्तः प्रस्तुतोहेतुः स्वयमेव प्रकृतसाध्यस्यासाधको भवति। यथा 'अग्नीषोमीयपशुहिंसा अधर्मः हिंसात्वात्' बाह्यहिंसावत् इति अवैदिकानां सांख्यानां च प्रयोगे, निषिद्धत्वमुपाधिः। अन्यत्र नरक साधनाधर्मत्वेनाभिमतसुरापानानृतवदनब्राह्मणहननादौ निषिद्धत्वमेव नरकसाधनाधर्मताहेतुतया क्लृप्तमिति निषिद्धत्वस्यैव नरकसाधनाधर्मत्वं व्याप्यत्वात् प्रकृतहिंसात्वहेतुः अप्रयोजकत्वात् स्वयमेवासाधकोभवति। एवं च क्रतुहिंसायां निषिद्धत्वाभावादेव तद्व्यापकाधर्मत्वस्याप्यभावः इति न हिंसात्वमात्रेणाधर्मत्वम्। उपाधिलक्षणं तु साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वम्। प्रदर्शितनिषिद्धत्वोपाधौ च समन्वयः, निषिद्धत्वं हि न हिंसात्वदेशे सर्वत्रवर्तते क्रतुहिंसायां निषिद्धत्वाभावात्। अतः साधनाव्यापकत्वम्। निषिद्धानां सर्वेषामधर्मत्वात् अधर्मभूतानां च सर्वेषां निषिद्धत्वाच्च साध्यसमव्याप्तत्वंचेति समन्वयो भवति। यदि चात्र साधनाव्यापकत्वमुपाधिरित्येवोच्येत तर्हि—पर्वतो वह्निमान् धूमात्' इत्यत्र महानसत्वमुपाधिरितिस्यात्। न हि धूमेसति सर्वत्र महानसत्व सद्भावः, अतः साधनाव्यापकत्वात् तस्याप्युपाधित्ववारणाय साध्य समव्याप्त इति, न हि महानसत्वस्य वह्निना साकं समव्याप्तत्वमिति तद्वारणम्। ननु तर्हि साध्यव्यापकत्वेसति इति निवेशमात्रेणैवमहानसत्वादेर्वारणसंभवात् समेति कुतः इति चेत्। सत्यं—'पर्वतो वह्निमानित्यत्रैव पर्वतेतरत्वादेरुपाधित्ववारणाय समेत्यस्यावश्यकत्वात्। पर्वतेतरत्वस्य हि धूमस्य पर्वतेतरत्वं विनापि पर्वते दर्शनेन साधनाव्यापकत्वम्। एवं महानसादीनां पूर्वं अग्निमत्वेन अवधारितानां पर्वतेतरत्वेन साध्यव्यापकताचेति पर्वतेतरत्वं 'पर्वतो वह्निमान् धूमात्'

इत्यत्रोपाधिः स्यात्। तदर्थंसमेतिनिवेशो च न हि पर्वतेतरेषां सर्वेषां अग्निमत्त्वमिति समव्याप्तेरभावान्नदोषः। एवं यदि साध्यसमव्याप्तत्वमुपाधिरित्येवस्यात् तर्हि, धूमादग्नौ साध्ये अग्निसामग्रीकत्वमुपाधिरिति स्यात्। आस्ते हि अग्निसामग्र्याः वह्निना साकं समव्याप्तिः। अतस्तद्वारणायोक्तं साधनाव्यापक इति' अग्निसामग्री च धूमंप्रति अग्निवद्व्यापिकैवेति तद्वारणम्।

यदाचास्योपाधेः साध्यव्यापकत्वाद्यनिश्चयः तदाशङ्कितोपाधित्वमिति व्यवहारो भवति। यथा मैत्र्याः अष्टमगर्भस्य मैत्रीतनयत्वेन हेतुना श्यामत्वे साध्यमाने शाकाद्याहारपरिणामरूपोपाधिः। अष्टमपुत्रे तस्य नास्तित्वेस्थित एव तस्य साधनाव्यापकत्वं भवेत्। स च तत्रापि शङ्क्यत एवेति साधनाव्यापकत्वं अनिश्चितमेव उपाधेः। अतः शङ्कितोपाधिरयम्। अतःश्च

उपाधिस्स हि धर्मःस्यात् पक्षभूमिमनाप्नुवन्।
सपक्षान् व्याप्नुवन् यःस्यात् इति लक्षणमिष्यताम्॥

एतादृशश्चोपाधिः धूमस्य अग्निसंबन्धे नैवेति स्वाभाविक एवासौ संबन्धः। अयमेव च संबन्धः व्याप्तिरित्युच्यते। इयं च व्याप्तिः कथं गृह्यते इति चेत्—ब्रूमः, भूयोदर्शनजन्यसंस्कारसहितेन्द्रियेण चेति। प्रथमं हि महानसादौ पुनः पुनः धूमस्याग्निसंबन्धं दृष्टवा तत्र महानसत्व, गृहत्व, तत्तद्ग्रामत्वादीनुपाधित्वेनाशङ्क्या तत्र तत्र व्यभिचारदर्शनेन परिहृताशङ्कः अन्यानप्युपाधीन् योग्यानुपलब्ध्या निराकृत्य धूमाग्न्योः स्वाभाविक एव संबन्धः इति निश्चिनोति। अतः निरुपाधिकसंबन्धो व्याप्तिः। साच भूयोदर्शनगम्या इति च सिद्धम्। नन्विद मयुक्तं भूयोदर्शनमात्रेण निरुपाधिकत्वनिश्चयायोगात्। यतः मैत्रीतनयत्वश्यामत्वयोर्भूयोदर्शनेऽपि निरुपाधिकसंबन्धासंभवः इति चेत्, सत्यं

न केवलेन भूयोदर्शनेन तादृशसंबन्धावधारणं, किं तर्हि ? तत्र प्रमाणोत्पत्यनुगुणः तर्कोऽपि तत्र सहायतया स्वीक्रियते।

तत्र तर्को नाम साध्यमानस्यार्थस्य अन्यथात्वशङ्कायां तदपनोदनाय अन्यथात्वे दोषवर्णनम्। यथा धूमेन अग्नौ साध्यमाने हेतुमङ्गीकृत्य साध्यं मास्त्विति अप्रयोजकत्वशंकायां वह्नेरभावे धूमोऽपि न स्यात् इति अन्यथात्वे दोषकथनम्। अत एव 'अनिष्टप्रसङ्गः तर्कः' इति तार्किकाः। अस्यैव च विपक्षे बाधकः इति नामान्तरम्। तर्कस्य चास्य पञ्चाङ्गानि—यथा चाहुः

व्याप्तिस्तर्काप्रतिहतिः अवसानं विपर्यये।
अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम्॥ इति

अत्र पूर्वप्रदर्शिते 'यद्यत्राग्निर्नस्यात् तर्हि धूमो नस्यात्' इत्यादि तर्के अग्न्यभावरूपं साध्यवैपरीत्यमारोपितमेव, वस्तुतस्तत्राग्नेः सत्वात् एवं च तेन आरोपितेन अग्न्यभावादिना धूमाद्यभावस्यानिष्टस्य प्रसंजनं क्रियते। तत्रप्रसंजकं अग्न्यभावादिकं आहार्यलिङ्गम्। तस्य प्रसंजनीयेन व्याप्तिः प्रथममङ्गम्। तर्काप्रतिहतिः द्वितीयमङ्गम् प्रतितर्कैरप्रतिहतिः इत्यर्थः। प्रसंजनीयविपर्यये पर्यवसानं तृतीयमङ्गम्। एवं चेदेवं स्यात् नचैवमिति (वह्न्यभावे धूमाभावोऽपि स्यात्, नत्वत्र धूमाभाव इति)।

प्रसंजनीयस्य अनिष्टत्वं च प्रसिद्धचंर, धूमाभावस्य प्रसंजनीयस्य प्रत्यक्षविरुद्धत्वेनानिष्टत्वात्। इदं चतुर्थमङ्गम्।

अननुकूलत्वं परपक्षासाधकत्वम् पञ्चमाङ्गम्। एतादृशपञ्चाङ्गेष्वन्यतमेनापि हीनत्व तर्काभासत्वं भवति। यथा व्याप्तेरभावे यद्यत्र अग्निमत्वं न स्यात् तर्हि पर्वतत्वमपि न स्यात् इत्युक्तौ अग्न्यभाव

पर्वतत्वाभावयोर्नहि व्याप्तिर्दृष्टचरी अग्न्यभाववत्पर्वते, पर्वतत्वाभावाभावात् ।

तर्कप्रतिहतौ यथा 'यदीयं मेघोन्नतिः वृष्टिमती न स्यात् तर्हि निबिडाऽपि न स्यात्' इति तर्कः 'यदीयं वृष्टिमती स्यात् तर्हि वातोद्रेकवती न स्यात्' इति प्रतितर्केणपराहतः। 'शब्दोऽनित्यः कृतकत्वात्' इति मीमांसकं प्रतिप्रयुक्ते शब्दानित्यत्वानुमाने यद्यनित्यो न स्यात् तर्हि कृतकोऽपि न स्यात्' इति तर्कः विपर्यये पर्यवसानरहितः। मीमांसकं प्रति कृतकश्चायं इति पर्यवसाययितुमशक्यत्वात् ।

मीमांसकानां समये शब्दस्याकृतकत्वात्। पूर्वोक्ततर्क एव अनिष्टत्वरूपचतुर्थाङ्गहानिः (नाम इष्टत्वं) कृतकत्वाभावस्य मीमांसकानामिष्टत्वात् ।

अननुकूलत्वरूपाङ्गाभावे (अनुकूलत्वे) यथा 'कर्म अनुमेयं कर्मत्वात्' इति अनुमेयतावादिनां प्रयोगे अप्रयोजकत्वशङ्कानिवारकस्तर्कः, अनुमेयत्वाभावे कर्मैव न स्यात् इति हि स्यात्। स च प्रत्यक्षत्ववादिनामपि अनुकूलः तैरपि 'कर्म प्रत्यक्षं कर्मत्वात्' इति कर्मणः प्रत्यक्षतांसाधयित्वा अन्यथा कर्मैव न स्यात् इति वक्तुं शक्यत्वात् अतः पूर्वोक्ताङ्ग पञ्चके अन्यतमेनापि हीनः न समीचीनस्तर्कोभवतीति तेन नाप्रयोजकता शंकानिरासोभवेदिति पञ्चाङ्गोपेतस्तर्क एव समीचीनः। अनिष्टप्रसङ्गरूपत्वाविशेपात् आत्माश्रयाश्च दोषाः तर्क एवान्तर्भवन्ति ।

ननु तर्कस्यास्य क उपयोगः? इति चेदुच्यते, व्याप्तिग्रहण वेलायां, अनुमानोत्थानावसरेवा व्यभिचारशङ्कांनिवर्त्य व्याप्तिंप्रशोध्य अनुमानस्य इति कर्तव्यतां भजते। अथ 'यद्यग्निर्नस्यात् तर्हि धूमोऽपि न स्यात्' इति तर्केण वा कथं व्यभिचारशङ्कायाः निवृत्तिः? अग्न्यभावेऽपि धूमः कुतो न स्यात्? इति शंकाया अवारणात्' इति चेत्-सत्यं

अत एव शङ्काव्याघातपर्यन्तं तर्कमार्गेण गन्तव्यमिति तार्किकाः ब्रुवते। प्रकृते च यद्यग्न्यभावेऽपि धूमः स्यात् तर्हि विनाऽपिकारणं कार्यं स्यात् इति तर्कः प्रयोक्तव्यः, कारणं विनाऽपिकार्यं कुतोनस्यात्' इति तत्रापि शङ्कानैवोदेतुमर्हति, लोकविरोधात् । न च धूमाग्न्योः कार्यकारणभाव एव निष्प्रमाणकः इति शक्यं वक्तुं, यद्यग्निः धूमकारणं नस्यात्, तर्हि धूमस्य कारणान्तरादर्शनेन निष्कारणत्वमेव भवेत् इति तर्केण सर्वविजयात् । न केवलमनुमाने परं तर्कापेक्षणं, किं तर्हि? प्रत्यक्षादि सर्वप्रमाणान्यपि हि तर्कमपेक्षन्ते । यथा 'अयं घटः' इति प्रत्यक्षं हि घटरूपावयविनं विषयीकृत्य प्रवर्तते इति मीमांसकादयो मन्वते। बौद्धाश्च परमाणुपुञ्ज एव घट इति तत्र परमाणूनां विषयतां संगिरन्ते। तत्र सुगतकथित परमाणुगोचरतानिरासः तर्केणैव भवति । तत्र तर्काकारश्चैवं, यदि परमाणुविषयतास्यात् तर्हि एकत्वेन महत्वेन च भानंनस्यादिति । एवं शाब्दस्थलेऽपि, यद्यध्ययनविधिः स्वर्गफलकः स्यात् तर्हि दृष्टे संभवत्य-दृष्टकल्पनात् गौरवं स्यात् इति तर्केण अनुगृहीतो अध्ययनविधिः अर्थ ज्ञानफलको भवतीति । एवमेव सर्वप्रमाणानां तर्कापेक्षणादेव प्रामाण्यं इति विभाव्यम् । एवं च तर्कसहायेन भूयोदर्शनेनैव व्याप्तिः (निरु-पाधिकसंबन्धः) अवधार्यते । भूयोदर्शनतर्कयोरुपयोगस्त्वेवं ।

भूयोदर्शनतः शक्या दृश्योपाधिनिराक्रिया ।
अदृश्योपाधिशंकातु तर्कैरेव निरस्यत ।। इति ।

बौद्धाः व्याप्तिसिद्धिः तदुत्पत्त्या, तादात्म्येन वा,, यथा शिश पात्ववृक्षत्वयोः तादात्म्यम्, धूमस्य अग्निना व्याप्तौ तु तदुत्पत्तिरिति प्राहुः, तदिदं कृत्तिकोदयरोहिण्यासत्त्योः व्याप्तौ तादात्म्यतदुत्पत्त्यो रुभयोरप्यभावात् असमीचीनम् , अतः निरुपाधिकसंबन्धोव्याप्तिरित्येव युक्तम् ।

व्याप्यः, नियाम्यः, गमकं, लिङ्गं, साधनं, हेतुः, इति पर्यायशब्दाः। व्याप्यस्य च तस्य धूमादेः त्रिविधं दर्शनं विवक्षितम्। यथा महानसादौ व्याप्तिग्रहणवेलायां धूमादेर्दर्शनं प्रथमम्। पक्षे पर्वत देशादौ तद्दर्शनं द्वितीयम्। धूमादेर्दर्शनानन्तरं व्याप्तेः स्मरणेन पश्चात् वह्न्यादिव्याप्यो धूमादिरत्रवर्तते इति यदनुसंधानं, तदेव तृतीयम्। तदेव च व्याप्यदर्शनमित्युच्यते। तदनन्तरमेव च वह्निज्ञानस्योत्पत्तिरिति। ननु भाष्ये (शा) 'अनुमानं ज्ञातसंबन्धस्य एकदेशदर्शनात् एकदेशान्तरे असन्निकृष्टे अर्थे बुद्धिः' इत्यत्र 'असन्निकृष्टे'तिपदं कमर्थमभिप्रैति इति चेदुच्यते अपरिच्छिन्नमिति। अयं भावः-पूर्वमेव सत्वेन प्रमाणान्तरपरिच्छिन्ने (ज्ञाते) यद्यनुमानं प्रवर्तेत, तर्हि अनुवाद एव भवेत्. असत्वेन परिच्छिन्नेऽर्थे प्रवर्तेत चेत् बाधितत्वेनाप्रामाण्यमेवस्यादनुमानस्येति तदुभयनिवृत्यर्थं असन्निकृष्टपदमिति। उक्तं च वार्तिके

असन्निकृष्टवाचा च द्वयमत्रजिहासितम्।
ताद्रूप्येण परिच्छित्तिः तद्विपर्ययतोऽपि वा ॥ इति।

ननु 'असन्निकृष्टेति पदमयुक्तं तथाहि किं धूमेन अग्निविशेषो अनुमीयते, अग्निसामान्यं वा, नान्त्यः पूर्वमेवावगतत्वात्, नाद्यः, अग्निविशेषेणव्याप्तेरभावात्। तदुक्तं चार्वाकैः

विशेषे अनुगमाभावात् सामान्ये सिद्धसाधनात्।
अनुमाभङ्गपङ्केऽस्मिन् निमग्ना वादिदन्तिनः ॥ इति।

अत्र ब्रूमः न तावत् केवलयोः सामान्ययोः व्याप्तिसिद्धिः, तथा चेत् व्याप्तिग्रहोनाम धूमत्वं वह्नित्वंच स्वतः संबद्धमितिस्यात्। तथा च वह्निवृत्तिजातिसंबन्धात् धूमत्वमेव वह्निरिति स्यात्। अतः विशेषद्वारेणैव सामान्ययोर्व्याप्तिः सिध्यति। विशेषश्च तत्र तत्र विभिन्नत्वात् नियतो न निरूपयितुं शक्यत इति अनियतविशेषालिङ्गितयोर्व्याप्तिः इति हि

स्थितिः। एवं च पर्वतस्थतया अवगतो धूमः अनियतविशेषालिङ्गितं अग्निं पर्वते अनुमापयति। इह च यद्यप्यनियतविशेषालिङ्गितं अग्निसामान्यं व्याप्तिवेलायामेव च गृहीतम्, तदेवचात्राप्यनुमेयं, तथाऽपि इदानीं पर्वते अग्निरस्तीति देशकालविशेषस्याप्यनुमीयमानत्वात् तस्य च पूर्वमप्राप्तत्वात् नैव सिद्धसाध्यताया अवकाशः।

अनुमानं प्रति च व्याप्तिः, पक्षधर्मत्वं चेत्युभयमप्यङ्गम्। व्याप्त्या हि वह्निसामान्यवेदनम्। धूमस्य पक्षवृत्तित्वरूप पक्षधर्मत्वज्ञानेन तु वह्नेः पक्षवृत्तित्वज्ञानं जायते।

केचित्तु धूमवान् देशोवह्निमानपि भवतीति पूर्वमेव (व्याप्ति ग्रहणवेलायां) गृहीतत्वात् वह्निमत्वस्य, न वह्निमत्वं प्रमेयं अनुमाने, अपि तु धूमवत्वमेव पर्वतस्येदानीं ग्रहीतव्यमित्याहुः तन्न, वह्निमत्व ज्ञानकारणीभूत धूमवत्वस्य इदानीमेव ग्रहणात् कथं पूर्वमेव वह्निमत्वं गृहीतमिति घटते। किंच धूमवत्वं कामं प्रत्यक्षस्य प्रमेयंस्यात् न तु अनुमानस्येति दूषणमपि भाव्यम्। तथा च सुष्ठूक्तं भाष्ये असन्निकृष्ट ज्ञानस्यानुमानत्वमिति।

अनुमानं चेदं त्रिविधं, केवलान्वयि, केवलव्यतिरेकि, अन्वय-व्यतिरेकिचेति। व्याप्तिर्हि द्विविधा अन्वयव्याप्तिः व्यतिरेकव्याप्तिश्चेति। हेतोः सद्भावे साध्यस्यापि सद्भावः अन्वयव्याप्तिः। साध्यस्य अभावे साधनस्याभावः, व्यतिरेकव्याप्तिः, व्यतिरेकव्याप्तौ व्याप्यव्यापक भावौ अन्वयात् विपरीतौ वर्तेते। अग्न्यभावो व्याप्यः धूमाभावश्च व्यापक इति। अग्नेरधिकदेशवर्तित्वात् धूमापेक्षया व्यापकत्वं, तद-भावस्य च धूमाभावात् अल्पदेशवर्तित्वात् व्याप्यत्वम्। एवं धूमस्य अग्न्यपेक्षया अल्पदेशवर्तित्वात् व्याप्यता, अग्नेस्तु धूमापेक्षया अधिक देशवृत्तितया व्यापकता इति वैपरीत्योपपत्तिः बोध्या।

यस्यचोभयविधाऽपि व्याप्तिरस्ति तदन्वयव्यतिरेकि। यथा धूमानुमानादि। धूमस्यहि अग्निना अन्वयः महानसादौ परिदृष्टः, अग्न्यभावे धूमाभावश्च महाह्रदादाविति अन्वयव्यतिरेकित्वम्। यस्य हि अन्वयव्याप्तिरेव वर्तते तत् केवलान्वयि यथा धीः अन्यधीप्रकाश्या, वस्तुत्वात्, घटवत् इत्यादि, अत्रधीप्रकाश्यत्वाभावे वस्तुत्वाभावः नैव कुत्रापि प्रदर्शयितुं शक्यः, सर्वेषां पदार्थानां ज्ञानप्रकाश्यत्वात्। यस्य च हेतोः केवलं व्यतिरेकव्याप्तिरेव वर्तते स केवलव्यतिरेकी यथा सर्वज्ञानं स्वप्रकाशं ज्ञानत्वात् इति। अत्र हि यत्र स्वप्रकाशत्वाभावः तत्र ज्ञानत्वाभावः यथा घटादौ इति व्यतिरेकव्याप्तिरेव वक्तुं शक्यते न तु यत्र ज्ञानत्वं तत्र स्वप्रकाशत्वमित्यन्वयव्याप्तिः, दृष्टान्तालाभात्, अतः केवलव्यतिरेकी हेतुरयम्। केवलव्यतिरेकिण एव हेतोः आवीतहेतुरिति च पर्यायः।

कौमारिलास्तु केवलव्यतिरेकिणं नैवाभ्युपगच्छन्ति। कुत इति चेत्, सर्वत्र ह्यनुमाने क्वचिदन्यत्र प्रसिद्धं हि अन्यत्र साध्यते यथा महानसे प्रसिद्धो वह्निः पर्वतादौ। केवलव्यतिरेकिणि च 'सर्वं ज्ञानं स्वप्रकाशं ज्ञानत्वात्' इत्यादौ स्वप्रकाशत्वस्य अन्यत्रकुत्राप्यप्रसिद्धेः कथमत्र पक्षे साध्येत। अतः तादृशस्थले अप्रसिद्धविशेषणत्वरूपदोष (पक्षदोष) इति, केवलव्यतिरेकी न शक्यनिरूपः इति।

एतेन यदत्र केचिन्नैयायिका अवोचन् अनुकूलतर्के सत्यप्रसिद्धविशेषणत्वं न दोषायेति, तदप्यपास्तम्। तर्को हि नाप्रसिद्धार्थं शशशृङ्गादिकमपि साधयितुं क्षमः क्वचित्। अतोह्यप्रसिद्धदोषः तर्के सत्यपि दुस्त्यजः इति केवलव्यतिरेकिणि अप्रसिद्धविशेषणत्वरूपपक्षदोषः अपरिहार्य एवेति कौमारिलानामाशयः।

न च वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि धर्मत्वात् यथा घटत्वं पटादिषु इति सामान्यतः वेद्यत्वविरहरूपे स्वयंप्रकाशत्वे सिद्धे विशेषेण ज्ञानत्वादिना पक्षे साध्यते इति नेदानीं पक्षस्याप्रसिद्ध विशेषणत्वमिति वाच्यम् । वस्तुरूपस्य धर्मस्य नात्यन्तं क्वचिदपि नास्तिता संभवतीति नियमात् । अन्वयव्यतिरेकिणः हेतोः अपेक्षित धर्माः पञ्चसन्ति । पक्षधर्मत्वं, सपक्षवृत्तित्वं, विपक्षात् व्यावृत्तत्वं, अबाधितविषयकत्वं, असत्प्रतिपक्षत्वं चेति । तत्र पक्षधर्मत्वं नाम जिज्ञासितसाध्यः यः पर्वतादिः पक्षः तन्निष्ठत्वं हेतोः । (पक्षधर्मत्वम्। सपक्षो निश्चितसाध्यो महानसादिः तत्र वर्तमानत्वं हेतोः सपक्षवृत्तित्वम्। यश्च महाह्रदादिः निश्चितसाध्याभाववान्, तत्रावर्तमानत्वं विपक्षात् व्यावृत्तत्वम् । साध्यस्य मानान्तरेणाबाध्यत्वमेव अबाधितविषयकत्वम्। साध्याभावसाधकप्रतिहेत्वभावः असत्प्रतिपक्षत्वमिति बोध्यम् ।

पूर्वनिरूपितहेतुत्रयमध्ये केवलान्वयिनः विपक्षाभावे चत्वार एव धर्माः । एवं केवलव्यतिरेकिणः सपक्षे सत्वरूपधर्माभावः, सपक्षाभावात् । अतस्सिद्धं अनुमानं द्विविधं त्रिविधं वा ।

तदिदं अनुमानं पुनरपि द्विविधं, सामान्यतोदृष्टं (विशेषतो) दृष्टं चेति। एकव्यक्तिमात्रदृष्टत्वे विशेषतो दृष्टत्वं, यथा कृत्तिकोदयात् रोहिण्यनुमितौ । यत्र तु सामान्यतो व्याप्तिदृष्ट्या अनुमीयते यथा धूमादिनावह्न्याद्यनुमाने तत्र सामान्यतो दृष्टत्वमिति बोध्यम् ।

नैयायिकास्तु प्रत्यक्षयोग्यपदार्थविषयकमनुमानं विशेषतो दृष्टम्। अतीन्द्रियार्थविषयकं यत् अनुमानं यथा चक्षुरादिविषयकं तत् सामान्यतो दृष्टमिति प्राहुः । तदिदं न चतुरश्रम् । चक्षुरादीनां अतीन्द्रियाणां अनुमातुमशक्यतया अर्थापत्त्यैव साध्यमानत्वात् । अनुमानं तावत् व्याप्तिमेवोपजीव्यत्वेन स्वीकृत्य प्रवृत्तमिति व्याप्तिदर्शितमार्गात्

नैव चलितुं क्षमते। एवं च व्याप्तिज्ञानवेलायां वस्तु यादृशं दृश्यते तादृगेव अन्यत्र व्याप्येन हेतुना अनुमातव्यं भवेत् यथा अनलः उष्णः भास्वरश्चेति। अतीन्द्रियवस्तूनां च चक्षुरादीनां न प्राक् दृष्टाकारयोगस्सं भवति। अतः अनुमानाप्रसक्तेः रूपादिदर्शनान्यथानुपपत्त्या चक्षुरादय स्साध्यंते इति। इदं चानुमानं स्वार्थानुमानं परार्थानुमानं चेति द्विविधं पुनः। यत्र हि स्वयमेव धूमादिकं विलोक्य व्याप्तिप्रभृतिनिरूपणेन अनुमिमीते तत्र स्वार्थानुमानम्। यदा च स एवार्थः परवाक्येन बोध्यते, तदा परार्थमिति भिदा।

तत्र परार्थानुमानवाक्यं पञ्चावयवोपेतमिति तार्किकः ते च पञ्चावयवाः प्रतिज्ञा, हेतु, उदाहरण, उपनय, निगमरूपाः—अयं पर्वतो वह्निमान्, धूमवत्वात् यो यो धूमवान् स सोऽग्निमान् यथा महानसः, धूमवांश्चायं, तस्मादग्निमानेवेति। (अत्र अन्यस्मै प्रतिपादनाय पक्षप्रतिपादकवचनं प्रतिज्ञेत्युच्यते) 'पर्वतोवह्निमानि'ति। साधनत्वा वेदकं हेतु प्रतिपादकं वचनं हेतुः धूमादिति। व्याप्तिनिवेदनपुरस्सरं दृष्टान्तकथनमुदाहरणं यो यो धूमवान् स सोग्निमान् यथा महानस इति। सिद्धव्याप्तिकस्य हेतोः पक्षे कथनं उपनयः, 'धूमवांश्चाय'मिति। सहेतुकं पक्षस्य साध्यवत्वेन पुनः कथनं निगमनं, 'तस्मादयं वह्निमान्' इतिप्राहुः।

इदं तु न समीचीनं अवयवत्रयेणैव उपपत्तिसंभवे पञ्चावयव पर्यन्तधावनस्यानवसरग्रस्तत्वात्। तथा हि उपनयनिगमनात्मकान्ति मावयवद्वयमपि, प्रतिज्ञाहेतुरूप प्राथमिकावयव द्वयेनैव गतार्थमिति अति रिक्तावयवद्वयस्वीकरणस्यायुक्तत्वात्। अतः उदाहरणोपनयनिगमनरूपा वयवत्रयेणवा, प्रतिज्ञाहेतूदाहरणरूपावयवत्रयेण वा निर्वाहे संभवति पौनरुक्त्यरूपदोषापत्त्या न पञ्चावयवस्वीकारावश्यकतेति।

बौद्धास्तु यो धूमवान् सोऽग्निमान् यथा महानसः, धूमवांश्चायं इति प्रोक्ते तस्मादग्निमानित्यर्थात् सिध्यति। एवं चोदाहरणोयनय

रूपावयवद्वयेनैवालमिति वर्णयन्ति । इदमपि साध्यांशे अध्याहाराख्य दोषप्रसङ्गादयुक्तमेवेति । अतः उदाहरणान्तमवयवत्रयं वा उत उदाहरणादिकमवयवत्रयं वा पर्याप्तमिति मीमांसकपक्ष एव युक्तः ।

इदानीमनुमानस्य दोषास्संभाविताः निरूप्यन्ते । तत्र प्रतिज्ञा दोषाः, हेतुदोषाः, दृष्टान्तदोषाश्चेति त्रिविधाः दोषाः वार्तिके निरूपिताः । (तत्र प्रतिज्ञा नाम परबोधनाय पक्षवचनम्)। पक्षश्च स एव यो जिज्ञासितधर्मयुक्तः तत्र एते दोषास्संभाविताः, सिद्धविशेषणत्वं, बाधितविशेषणत्वं, अप्रसिद्धविशेषणत्वं चेति । तत्र 'वह्निरुष्णः पदार्थत्वात् इति सिद्धविशेषणत्वम्। अत्रैव वह्निरनुष्णः, इति बाधितविशेषणत्वं । 'क्षित्यादिकं सर्वज्ञकर्तृकं' इति चाप्रसिद्धविशेषणत्वम् । कुत्रापि पक्षव्यतिरिक्तघटादौ सर्वज्ञकर्तृकत्वस्याप्रसिद्धत्वात् । अतः पूर्वोक्तस्थलेषु पक्षाभासाख्यो दोषः ।

बाधितविशेषणत्वरूपपक्षाभासः बाधकप्रमाणभेदादनेकविधो भवितुमर्हति । तत्र 'वह्निरनुष्णः' इति प्रत्यक्षबाधः । मनः नेन्द्रियं, अभूतात्मकत्वात् इत्यत्रानुमानबाधः, मनसः इन्द्रियत्वेनैवानुमीयमानत्वात् मनोरूपधर्मिग्राहकेणैवानुमानेन अनिन्द्रियत्वपक्षस्यानुमानबाधः।

एवं 'दर्शपूर्णमासौ स्वर्गसाधनं न भवतः क्रियात्वात्, गमनवत्' इत्यत्र शाब्दबाधः, 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वचनेन स्वर्गसाधनत्वस्य तत्रावगमात् ।

गौः गवयसदृशो न भवति प्राणित्वात् इत्यत्रोपमानाद्बाधः। देवदत्तः बहिर्नास्ति, तत्रादृश्यमानत्वात् इत्यत्र अर्थापत्त्या बहिर्भावस्य साध्यमानतया अर्थापत्त्या बाधः ।

एवमन्येऽपि पक्षदोषास्सन्ति—यथा, यावज्जीवमहं मौनी, इत्युक्तौ स्वोक्तिव्याघातः । इन्दुश्चन्द्रशब्दवाच्यो न भवति इत्यत्र

लोकविरोधः। इमे पक्षदोषाः वार्तिकावलंबनेन निरूपिताः। सुधीभिरन्येप्यूहितुं शक्यन्ते।

अथ हेत्वाभासाः निरूप्यन्ते। हेतुर्नाम साध्यव्याप्तः साधनधर्मः। तदाभासाश्चत्वारः, असिद्धः, विरुद्धः अनैकान्तिकः, असाधारणश्चेति। तत्रासिद्धो नाम सिद्धभिन्नः, सिद्धो नाम सिद्धिविशिष्टः। सिद्धिश्च व्याप्तिविशिष्टस्य हेतोः पक्षसंबन्धित्वे न ज्ञानम्। ज्ञाने चास्मिन् हेतुः व्याप्तिः, पक्षः, संबन्धः, ग्रहश्चेति पञ्चांशाः भासन्ते, तेषां मध्ये एकांशस्याप्यभावे असिद्धत्वमिति बोद्धव्यम्।

तत्र हेतुस्वरूपमेवासिद्धं चेत् तत्र स्वरूपासिद्धिरित्युच्यते यथा 'बुद्धः मोहरहितः सर्वज्ञत्वात्' इति। तत्र हि न सर्वज्ञत्वं मीमांसकानां क्वचिदपि संमतम्।

अयं च स्वरूपासिद्धः पुनरपि द्विविधः विशेषणासिद्धो विशेष्यासिद्धश्चेति। आद्यः यथा बुद्धो धर्मोपदेष्टा, सर्वज्ञत्वे सति शरीरित्वात् इति, अन्त्यश्च शरीरित्वे सति सर्वज्ञत्वात् इति च।

व्याप्यत्वासिद्धः व्याप्त्यभावे, यथा, अग्नीषोमीयादिहिंसा अधर्मः हिंसात्वात् इति। अत्र निषिद्धत्वेन सोपाधिकत्वात् व्याप्तेरभावः। पक्षाभावे आश्रयासिद्धिः—यथा, गगनारविन्दं, सुन्दरं, अरविन्दत्वात् इत्यत्र गगनारविन्दरूपपक्षाभावादाश्रयासिद्धिः। हेतोः पक्षसंबन्धाभावे संबन्धासिद्धिः, यथा शब्दः अनित्यः चाक्षुषत्वात् इति। यस्य हि हेतोः पक्षैकदेशे संबन्धो न संभवति स भागासिद्धः, यथा-वेदाः पौरुषेयाः उपाख्यानात्मकत्वात्, भारतादिवत् इति। अत्र हि न वेदत्वावच्छेदकावच्छेदेन उपाख्यानात्मकता, विधिभागादौ तदभावात् इति भागासिद्धत्वम्। अयमेव हि पक्षव्याप्त्यभावात् व्याप्त्यसिद्धः इति कैश्चिदुच्यते। यदा च विशेषणस्य विशेष्यस्य वा पक्षसंबन्धो न संभवति

तदा विशेषणविशेष्यासिद्धिरिति द्रष्टव्यम्। यथा गगनं अनित्यं, जन्यत्वे सति द्रव्यत्वात् इति, यथा वा तत्रैव द्रव्यत्वे सति जन्यत्वात् इति च। यत्र च व्यावर्त्याभावात् विशेषणं व्यर्थमत एव संबन्धानर्हं च, तत्र व्यर्थविशेषणासिद्धिः 'यथा घटो अनित्यः द्रव्यत्वे सति कृतकत्वात्' इति, अत्र द्रव्यत्वे सति इति व्यर्थविशेषणम्। तत्रैव कृतकत्वे सति द्रव्यत्वात् इति व्यर्थविशेष्यासिद्धत्वम्। यश्च हेतुः पक्षसंबन्धी न भवति किंतु आश्रयान्तरसंबन्धी भवति स हेतुः व्यधिकरणासिद्धः इति विभाव्यः, यथा घटो अनित्यः तद्‌गुणस्य कृतकत्वात् इति। अत्र हि कृतकत्वं न घटनिष्ठं किंतु तद्‌गुणनिष्ठमेवेति व्यधिकरणासिद्धत्वम्। यस्य च हेतोः पक्षाद्व्यतिरेकाभावः अत एव च पक्षसंबन्धित्वाभावश्च स हेतुः व्यतिरेकासिद्धः, यथा गगनं अनित्यं गगनत्वात् इति, अत्र पक्षभूतगगनस्वरूपाद्भिन्नतया गगनत्वं नैव निरूपयितुं शक्यते। अतोऽत्र व्यतिरेकासिद्धिः।

यत्र च हेतोः स्वरूपमेवाज्ञातं तत्राज्ञातासिद्धत्वं, यथा देवदत्तो बहुधनो भविष्यति तत्प्रयोजकादृष्टशालित्वात् इत्युक्तौ तादृशादृष्टसद्भावे प्रमाणं नास्तीत्यज्ञातत्वम्। एवं पर्वतो वह्निमान् धूमवत्वात् इत्यनुपदर्शित व्याप्तिकतया प्रयोगे व्याप्त्यज्ञानादसिद्धत्वम्। तार्किकास्तु—पक्षे हेतुस्वरूपाभाव एव स्वरूपासिद्धिः अतः संबन्धासिद्धिर्नाम नैव कश्चन भेदः इति वदन्ति—तदिदमयुक्तं, बुद्धः मोहरहितः सर्वज्ञत्वात् इत्यत्र सर्वज्ञत्वरूपहेतोः स्वरूपमेवासिद्धम्। कुत्रापि सर्वज्ञत्वस्य अदर्शनात्। अनित्यः शब्दः चाक्षुषत्वात् इत्यादौ चाक्षुषत्वं प्रसिद्धं, परं तु तत्संबन्धः प्रकृतपक्षस्य नैवेति पृथक्त्वस्वीकारस्यैव युक्तत्वात्।

अथविरुद्धः—अस्यैव च बाधक इत्यपि तत्र तत्र वार्तिके व्यपदेशः परिदृश्यते। अयं च द्विविधः स्वरूपबाधकः, तद्विशेषबाधकश्चेति।

तत्र यो हेतुः साध्याभावेनैव व्याप्तः सः (साध्य) स्वरूपबाधकः इत्युच्यते। यथा शब्दो नित्यः कृतकत्वात् इति। अत्र च कृतकत्वहेतुः साध्यभूतनित्यत्वविरुद्धानित्यत्वेनैव व्याप्त इति नित्यत्वं प्रति विरुद्धत्वात् तस्य बाधको भवति।

यश्च हेतुः साध्यविशेषस्य विपरीतेन विशेषेण व्याप्तः स विशेष विरुद्धः इत्युदीर्यते। यथा 'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात्' इति तार्किकाभिमतमीश्वरानुमानम्। अनुमाने चास्मिन् साध्यस्य क्षित्यङ्कुरादि कर्तुः अशरीरित्वं नाम विशेषः तार्किकाणामिष्टः। तस्य च विपरीतो विशेषः सशरीरित्वं, तेनैव व्याप्तं कार्यत्वं, प्रकृतानुमानहेतुभूतकार्यत्वस्य घटादिषु तथैव परिदृष्टत्वात्। अतः इदं कार्यत्वं अशरीरित्वस्य प्रकृतानुमानसाध्यविशेषस्य बाधकं भवति। यदा चाशरीरित्वं बाधितं, तदा कर्तृत्वमपि बाध्येतैवेति तार्किकाणां इदमनुमानं नैवावसरं लभते। इदं दूषणमजानन्त तार्किकाः नूनं कृपामर्हन्ति।

(अथानैकान्तिकः—व्यभिचरितो हेतुरनैकान्तिकः। विपक्षेऽपि वर्तमान इत्यर्थः। तस्यैव साधारण इति च नामान्तरम्। यथा अनित्यो घटः प्रमेयत्वात् इति। अत्र च प्रमेयत्वं नित्येष्वपि वर्तत इति अनैकान्तिको हेतुः। यस्य च हेतोः विपक्षवृत्तित्वं संदिग्धं स संदिग्धानैकान्तिकोहेतुः यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्चभावा अमी इत्यभियुक्तोक्तदिशा, भावाः क्षणिकाः सत्वात् इति प्रयोगे अक्षणिकेऽपि सत्वस्याक्षतत्वात् हेतोर्विपक्षवृत्तित्वं शंकितमेव।)

यश्च हेतुः पक्षमात्रे वर्तते सपक्षे सत्यपि न वर्तते तत्र, स असाधारणः यथा 'भूर्नित्या गन्धवत्वात्' इत्यनुमाने गन्धवत्वम्। अत्र नित्यपदार्थानां अनेकेषां सद्भावेऽपि प्रकृतानुमानहेतोर्गन्धवत्वस्य तेष्वविद्यमानतया असाधारणत्वम्। अतस्सिद्धं, असिद्धः विरुद्धः अनैकान्तिको, असाधारणश्चेति चत्वारो हेत्वाभासाः इति।

तार्किकास्तु सव्यभिचार, विरुद्ध, सत्प्रतिपक्ष, असिद्ध, बाधाः पञ्च हेत्वाभासाः इति वर्णयन्ति। अन्ये तु 'अप्रयोजक' इति षष्ठोऽपि कश्चन हेत्वाभास इति कथयन्ति। इदं द्वयमप्यसंगतम्। तथा हि योऽयं सत्प्रतिपक्षाख्यो हेत्वाभासः अतिरिक्तस्तार्किकैः स्वीकृतः स एव प्रकरण समः इत्यपि प्रोच्यते। तत्र 'प्रतिहेतुमान् हेतुः सत्प्रतिपक्षः इति तल्लक्षणम्। यथा 'वायुरप्रत्यक्षः अरूपत्वात्, मनोवत्' वायुः प्रत्यक्षः स्पर्शवत्त्वात् घटवत् इति। अयं च हेत्वाभासः पूर्वनिरूपितेषु चतुर्ष्वेव हेत्वाभासेषु अन्तर्भावयितुं शक्यते, कथमिति चेत् ब्रूमः-समानबलं परस्परविरुद्धहेतुद्वयं तावत् स्वात्मानं नैव लब्धुं क्षमम्। तथासति हि वस्तुनः अनुमानद्वयप्रापितविरुद्धरूपद्वयविशिष्टत्वापत्तेः। तत्रेष्टापत्तिश्च न भवति, वस्तुनि विकल्पायोगात्। अतः प्राबल्यदौर्बल्यभावः स माश्रयणीय एव। तत्र प्रबलदुर्बलयोर्विरोधे प्रबलस्य दुर्बलविषयापहार कत्वेव दुर्बलस्य अनुमानस्य बाधितविशेषणत्वात् बाध एवान्तर्भावः इति न सत्प्रतिपक्षस्य अतिरिक्तहेत्वाभासत्वम्। किं तर्हि ? बाधित एवान्तर्भाव इति।

न च हेत्वोर्विशेषेणानवगतिवेलायां तुल्यबलत्वस्यैवावास्तविक स्यापि संभवात् तदानीं प्रकरणसमत्वमेवेति वाच्यम्। तद्वेलायां बाध सन्देह इति नातिरिक्तहेत्वाभासत्वस्वीकारावकाशः। नो चेत् संदिग्धा-सिद्धादीनामपि अतिरिक्तहेत्वाभासत्वस्वीकारापत्तेः।

यद्वा सत्प्रतिपक्षस्य अनैकान्तिक एवान्तर्भावं ब्रूमः—तथाहि संशयहेतुरनैकान्तिक इति अनैकान्तिकस्य लक्षणं स्वीक्रियते। संशयश्च त्रिभिर्हेतुभिर्भवति, साधारणधर्मात्, असाधारणधर्मात् वादिविप्रतिपत्तेश्च। साधारणात् ऊर्ध्वत्वात् स्थाणुर्वा पुरुषोवेति, असाधारणाच्च गन्धवत्त्वात् पृथिवी नित्य अनित्या वेति, वादिविप्रतिपत्तेश्च शब्दो नित्योऽनित्यो

वेति संशयक्रमः। प्रकरणसमस्थले च प्रतिसाधनप्रयोगे विप्रतिपत्ति हेतुकः संशय एवेति अनैकान्तिकेष्वेवान्तर्भावः सत्प्रतिपक्षस्येति। तस्य चास्य सप्रतिसाधनस्य एकेनैव हेतुना साध्याभावस्यापिसाधने विरुद्धाव्यभिचारित्वम्। यथा नैयायिकाभिमते ईश्वरानुमाने 'क्षित्यङ्कुरादिकं सकर्तृकं, कार्यत्वात्' घटवत् इत्यस्मिन् 'क्षित्यङ्कुरादिकं ईश्वरकर्तृकं न भवति, कार्यत्वात् घटवत्'इति। अनुमानेचास्मिन् कार्यत्वरूपो हेतुः घटादिषु सकर्तृकत्वेनेव ईश्वरकर्तृकत्वाभावेन च व्याप्त इति विरुद्धाव्यभिचारित्वम्। सकर्तृकत्वमुखेन ईश्वरं साधयतां तार्किकाणां ईश्वर कर्तृकत्वाभाव विरुद्ध इति विरुद्धाव्यभिचारित्वं ज्ञेयम्। ततः सिद्धं बाधितविशेषणे अनैकान्तिके वा सत्प्रतिपक्षस्य अन्तर्भाव इति।

एवं कालात्ययापदिष्टो नाम हेत्वाभासोऽपि (बाधः) अग्निरनुष्णः पदार्थत्वात्, इति, बाधितविशेषणो नाम पक्षाभास एव न हेत्वाभासः। इति बोध्यम्।

ननु न वयं पक्षदोषाननुमनुमहे पक्षदृष्टान्तदोषा अपि हेत्वाभासेष्वेव हि योज्यन्ते। अतो न भवदुक्तं घटते इति चेत् न आभास सङ्करे तावत् पुरःस्फुरितदूषणं यत् तदेव हि उद्भाव्यं भवति नास्फुरितम्। ततश्च पक्षनिर्देशे यदि कश्चन दोषः चकास्ति तदा स दोषः पक्षस्यैवेति न्यायः न केनापि च्यावयितुं शक्यते। अतः वह्निरनुष्णः इत्यादौ, हेतोरप्रयोगेऽपि पक्षस्यैव प्रत्यक्षेन दुष्टत्वेन प्रतीतेः पक्षदोष एवायम्। एवमेव दृष्टान्तदोषा अपि। यो यत्र स्फुरितो दोषः स तस्यैवेतिन्यायात्। अक्षपादमुन्यकथनमात्रेण न न्यायः त्यक्तुं शक्यते।

अतः बाधितविशेषणोऽपि पक्षाभास एवेति न पञ्चमहेत्वाभासत्वं तस्येति।

एवं अप्रयोजकत्वरूपहेत्वाभासान्तरमपि न निरूपणार्हम्। अनुकूलतर्काभावे हेतोः प्रयोजकत्वं नास्तीत्यप्रयोजकत्वमिति हि

वक्तव्यं भवति। तत्र व्याप्यत्वासिद्धिरूपहेत्वाभास एव अप्रयोजकत्व मिति नातिरिक्तहेत्वाभासत्वम्। सर्वेषु हि अनुमानेषु अनुकूलतर्कैरेव व्यभिचारशङ्का अपनोदनीया, अत एव च निरुपाधिकत्वम्। अत श्चानुकूलतर्काभावे निरुपाधिकसंबन्धानिश्चयात् व्याप्यत्वासिद्धिरेव। अतः चत्वार एव हेत्वाभासाः, न पञ्च न वा षट् इति सिद्धम्।

अथ दृष्टान्ताभासाः निरूप्यन्ते। दृष्टान्तः उदाहरणं इति च पर्यायशब्दः। तदेव च साध्यसाधनयोर्व्याप्तिप्रतिपत्तिनिदानं च भवति। स द्विविधः, साधर्म्यदृष्टान्तः वैधर्म्यदृष्टान्त इति च। तत्र साध्यसाधनयोरन्वयो यत्र, तत्र साधर्म्यदृष्टान्तः, यथा यो धूमवान् सोऽग्निमान् यथा महानस इति। साध्याभावसाधनाभावयोः प्रदर्शनं यत्र तत्र वैधर्म्यदृष्टान्तः। यथा योऽग्निमान् न भवति स धूमवान् न, यथा महाह्रद इति।

साधर्म्यदृष्टान्ताभासाश्चत्वारः—साध्यहीनः, साधनहीनः, उभयहीनः, आश्रयहीनश्चेति। यथा, नित्यः ध्वनिः अकारणत्वात् प्रागभाववत् इति। अत्र यदकारणं तन्नित्यं इति नैव वक्तुं शक्यम्। प्रागभाववत् इत्युक्तौ साध्यहीनता। अकारणत्वेपि तस्यानित्यत्वात्। प्रध्वंसवत् इत्युक्तौ साधनहीनता। घटवत् इत्युक्तौ चोभयहीनता। शशशृङ्गवदित्युक्तौ चाश्रयहीनतेति क्रमादुदाहरणानि। पूर्वोक्तानुमाने नित्यत्वं नाम उत्पत्तिशून्यत्वे सति नाशाप्रतियोगित्वरूपमेवेति विवक्षितम्।

एवं वैधर्म्यदृष्टान्तेऽपि साध्याव्यावृत्तत्वादयश्चत्वारो दोषाः। यथा पूर्वोक्तानुमाने एव यन्नित्यं न भवति तदकारणमपि न भवति यथा प्रध्वंसः इति वर्णने साध्याव्यावृत्तत्वं यथा प्रागभावः इति चेत् साधनाव्यावृत्तता। यथा वा गगनमित्युक्तौ उभयाव्यावृत्तता। यथा शशशृङ्गमिति आश्रयहीनता।

अन्वयव्यतिरेकरूपोभयविधोदाहरणेऽपि अव्याप्त्यभिधानं विपरीतव्याप्त्यभिधानं चेति दूषणद्वयं भवति। यथा पर्वतो वह्निमान् धूमात् यथा महानसः इत्येतावन्मात्रोक्तौ अव्याप्तिः यो धूमवान् सोऽग्निमानिति व्याप्तेरकथनात्। यदा च यो धूमवान् सोऽग्निमानिति प्रकारं विहाय यो अग्निमान् स धूमवानिति कथ्येत, तदा विपरीतव्याप्त्यभिधानमिति। अनुमानमधिकृत्य वक्तव्याश्चानेके विषयाः सन्ति ते च वार्तिके सुधीभिर्विभावनीयाः तत्रैव। विस्तरभिया तूपरमम्यते।

॥ इति शास्त्रालोके द्वितीयः प्रसरः ॥

॥ अथ शब्दनिरूपणम् ॥

तार्किका हि अनुमानादनन्तरं उपमानं निरूप्य पश्चादेव शब्दं निरूपयन्ति। परं तु वादिपरिग्रहो हि उपमानापेक्षया शब्द एवाधिक इति शाब्दनिरूपणमेवप्रथममुचितम्। तत्र ज्ञातैः पदैः पदार्थस्मरणे कृते यत् असन्निकृष्टवाक्यार्थज्ञानं तच्छाब्दमिति गीयते। तच्चेदं शाब्दज्ञानं व्युत्पत्त्यधीनमिति आदौ व्युत्पत्तिरेव प्रदर्शनीया। तथा हि—बालः कश्चन 'गामानय' पुत्रस्ते जातः इति वाक्यं श्रोतुः पुरुषस्य तदनु जायमानं प्रवृत्तिहर्षादिकमुपलभ्यतयोः (प्रवृत्तिहर्षयोः) बुद्धिपूर्वकत्वात् गवानयनपुत्रजननाद्यर्थज्ञानानन्तरमेव अस्य प्रवृत्तिः हर्षादिकं च जातमिति निश्चिन्वन् तदर्थज्ञानस्य शब्दानन्तरमेव जातत्वात् 'गामानयेत्या'दि पूर्वोक्तवाक्यस्य गवानयनाद्यर्थबोधकत्वं निश्चिनोति। यद्यपि तद्वेलायां कश्शब्दः कस्यार्थस्य बोधकः इति न ज्ञातम्। तथापि 'गांबधान अश्वमानय' इत्यादिप्रयोगान्तरेषु पदान्तरसंबन्ध तदभावरूपावापोद्वापौ- दृष्ट्वा गोशब्दः सास्नादिमतो वाचकः आनयशब्दश्चानयनक्रिया वाचकः इति निश्चिनोति। (इदमेव पदैः पदार्थबोधनमित्युच्यते) तच्च

पदार्थबोधनं शब्दशक्त्या जायमानत्वात् अभिधानमेवेति पार्थसारथ्यादयः। अन्ये तु—शब्दोऽपि संस्कारोद्बोधरूपेणैव पदार्थंबोधयतीति स्मरणरूपमेव पदार्थज्ञानमिति वदन्ति। एवं च शब्दानां अर्थेषु नियमितानामपि स्वभावतः एकविशिष्टार्थविषयकज्ञानजनकत्वं तावदादौ निश्चितं निराबाधमवतिष्ठते। तथा च पदानां प्रत्येकमर्थबोधकत्वे स्थिते पदार्थज्ञानानन्तरं यत् वाक्यार्थज्ञानं विशिष्टार्थज्ञानरूपं जायते तत् किं पदैः उत पदार्थस्मृतिभिः इति विवेचनीयम्। तत्र तावत्तार्किकादयः एवमाहुः। पदानां अर्थबोधनएवोपक्षीणत्वात् वाक्यार्थेष्वपि तेषां प्रवृत्त्यंगीकारे गौरवात् पदार्थापेक्षया व्यवहितत्वाच्च सन्निहिताः पदार्था एव वाक्यार्थबोधं जनयन्ति इत्येव युक्तमिति। वाक्यार्थो नाम पदार्थानां संसर्ग एव हि नान्यः कश्चन। अतश्च संबन्धित्वेन अवश्यापेक्षितानां पदार्थानामेव तत्कारणत्वं युक्तमिति।

"सिद्धान्तिसंमतपक्षस्तु अभिहितान्वयवादः इति। तत्र च पदार्थाः पदैः स्मार्यमाणाः लक्षणयैव वाक्यार्थं बोधयन्ति। लक्षणायां बीजं तु तात्पर्यानुपपत्तिः। यदि पदैः स्मार्यमाणाः गवादिपदार्थाः परस्परमन्वयं विनैव तथैवावतिष्टेरन् तर्हि व्युत्पत्तिग्रहणकालावधृतं यत् पदानां विशिष्टार्थबोधतात्पर्यं तद्भज्येतेति अतः सामान्यरूपस्य वाच्यस्यानुपपत्तेः विशेष एव अन्योन्यान्वयरूपे पर्यवस्यन्ति पदानि। एवं च गौरियमानीयमानैव, आनयनं चेदं गोसांबन्ध्येवेति इतरेतरान्वयलाभात् गवानयनरूपवाक्यार्थसिद्धिः। एतद्विस्तरस्तु अस्मदीये श्लोकवार्तिकभूषणे (तद्भूताधिकरणे) अवसेयः।"

प्राभाकरास्तु अन्विताभिधानवादं स्वीचक्रुः। ते हि मन्यन्ते 'गामानय' इति प्रथमश्रवणे हि पदानामेव हि गवानयनरूपान्वितार्थ (वाक्यार्थो) प्रतिपादकत्वं इति वक्तव्यम्। एवं च तदनुसारेण

पुनरपि पदान्येव, अन्वितार्थबोधकानि न तु पदार्थाः इति निश्चीयते। ननु केवलं पदार्थानां बोधः पदेभ्यः किं न भवतीति चेत् केनोक्तं नास्ति इति, वर्तते, एव हि। तत्र चायं क्रमः। पदानि हि पदार्थान् स्मारयन्ति। न तु तत्रैव विरमन्ति किं तु स्मारितं स्वं स्वं अर्थं पुनः इतरपदार्थान्वितत्वेनैवाभिधायैव विरमन्ति।

अतः पदाभिधेय एव वाक्यार्थः। न तु पदार्थगम्यः पदार्थ गम्यत्वे च वाक्यार्थस्य प्रत्यक्षादिप्रमाणान्तरप्रतिपन्नेभ्योऽपि पदार्थेभ्यः वाक्यार्थप्रतिपत्तिः स्यात्, न च तदस्ति लोके। अतः वाक्यार्थस्य पदगम्यत्वमेव युक्तं न पदार्थगम्यत्वमिति।

(अत्र ब्रूमः—अत्यन्तं गौरवग्रस्तत्वात् तदिदं गुरुमतं दूरत्वान्तमेवेति। कथमिति चेत् प्राभाकरमते पदानामेव वाक्यार्थबोधकत्वात् तदनुकूला शक्तिः पदे कल्पनीयेति गौरवम्। अभिहितान्वयवादि (सिद्धान्तिनां) मते तु पदार्थानां स्मृतिसिद्धत्वात् वाक्यार्थस्यापि च लक्षणागम्यत्वात् शक्त्यन्तरकल्पनाप्रस्तावस्यैवाभावात् न गौरवावकाशः।)

(अपि च पदे वाक्यार्थानुकूलशक्तिसद्भावकल्पनापेक्षया पदार्थे तच्छक्तिसद्भावकल्पनैव हि लघीयसी। किमत्र विनिगमकमितिचेद्वदामः गमनरूपस्यैकस्यैवार्थस्य वाक्यार्थबोधकत्वेकल्पिते गमनपर्यायाणामन्येषामप्यन्वयः स्वत एव सिद्ध्यति सर्वेषामप्येकत्वात्। प्राभाकररीत्या च पदे शक्तिस्वीकारे हि गमनपर्यायाणां पदानां अनन्तानां भिन्नत्वात्, तावतां पदानां अर्थबोधकता न शक्तिकल्पनामन्तरेति पदभेदेन शक्तिभेद इति अनन्तशक्तिकल्पना अवर्जनीयैवेति महदिदं गौरवम्।)

किंच अनेकपदसंघातात्मके चैकस्मिन् वाक्ये सर्वेषामपि पदानामन्वितार्थबोधकतया, प्रतिपदं वाक्यार्थप्रत्ययः आपद्येतेति महदिदं संकटम्। यदपि चेदं अभिहितं पदार्थानां वाक्यार्थबोधकत्वे प्रत्यक्षादि

प्रमाणान्तरप्रतिपन्नार्थैरपि वाक्यार्थप्रतिपत्तिः स्यादिति । तत्र वदामः- प्राभाकरसमये 'गां बधान' इत्युक्ते प्रत्यक्षेण दृश्यमानः विगलित रशनः अत एव बन्धनापेक्षश्च अश्वः बन्धनक्रियया अन्वयं कुतो न लभते इति प्रश्ने किमुत्तरं ? अश्वस्य शब्दाप्रतिपन्नत्वादनन्वय इति चेत् अभिहितान्वयवादिनामपि मते प्रमाणान्तरप्रतिपन्नार्थानां शाब्दत्वा-भावादेव नान्वय इति समानमेतत् । अतः अन्विताभिधानवादिनां पक्षस्य गौरवदूषितत्वात् अभिहितान्वयपक्ष एव उचितः ।

तत्र वाक्येन वाक्यार्थाधिगमे आकांक्षा, सन्निधिः, योग्यता चेति त्रयमपि कारणम् । गौरश्वः पुरुषो हस्ती 'इत्यादौ आकांक्षाया अभावात्, अग्निना सिञ्चती 'त्यादौ योग्यताया अभावात् व्यवहित कालोच्चरितयोर्गामानय इत्यत्र सन्निधानाभावाच्च शाब्दबोधानुदय इति सिद्धं हि लोके । अतः त्रितयमपि कारणम् । शब्देन बोधितत्वा-भावेप्यसन्निधिरेव। यथा 'गां बधान' इत्यत्र, प्रत्यक्षोपस्थितस्य बन्धन सापेक्षस्यापि अश्वस्य नैवान्वयः भिन्नप्रमाणोपस्थितेः । अतः शब्दप्रति पन्नानामेवान्वयः इति सिद्धम् ।

प्राभाकरास्तु बुद्धिसन्निधिरेव पर्याप्ता न शब्दसन्निधेरपेक्षेति वदन्ति। तेषामपि 'गां बधाने'ति वाक्यप्रयोगे प्रत्यक्षादिनोपस्थितस्य अश्वस्य वारणं शब्देन सन्निधानाङ्गीकारे एव कर्तुं शक्यते, सर्वत्रापि शाब्दे बोधे शब्दसन्निहिततैवापेक्षिता । न च अश्वस्य प्रमाणान्तरोपस्थि तस्य वारणं तत्र तात्पर्याभावादेव कर्तुं शक्यते इति नानुपपत्तिरिति वाच्यम् 'अग्निना सिञ्चतीत्यादावपि' तात्पर्याभावादेव शाब्दबोधा भावः इति वक्तुं शक्यत्वेन योग्यतादीनामपि त्यागापत्तेः ।

अतः तात्पर्यं वाक्यार्थाधिगमे न स्वयं हेतुः । अपि तु योग्य-तादीनां हेतूनां साधारण्येन बोधसन्देहे तात्पर्यस्य नियामकत्वमात्रं हीष्टम् ।

भाष्ये 'शास्त्रं शब्दविज्ञानादसन्निकृष्टे अर्थे बुद्धिः' इत्यत्र असन्निकृष्टपदेन अनुवादकानां बाधितार्थावबोधकानां च वाक्यानामप्रामाण्यं इति सूचितम्। तदिदं शाब्दं प्रमाणं द्विविधं पौरुषेयमपौरुषेयं चेति। तत्र पौरुषेयं तु आप्तवचनरूपं, अपौरुषेयं तु वैदिकं वचनम्। प्राभाकराश्च पुरुषवचनानां वक्त्रभिप्रायानुमापकत्वेन प्रामाण्यं, न तु स्वयं वाक्यार्थबोधकतया इति वदन्ति। अतः लौकिकवचनानां अनुमाने अन्तर्भावः इति तदाशयः। ते हीत्थं वदन्ति—यद्यपि पदानां बोधकत्व शक्तिः व्युत्पत्तिसमये सिद्धा, तथापि पौरुषेयवचनानां व्यभिचार बाहुल्यात् सा शक्तिः कुण्ठिता हि भवति। तत्र च एतद्वाक्योच्चारयित्रा अमुमर्थं मनसि निधायैव वाक्यमिदं प्रयुक्तं इति यावन्नानुमीयते ताव द्व्यभिचारशंकायाः नैव निवृत्तिः, अतश्च तत्र वाक्यस्य शाब्दबोधजनक त्वाभावात् तदुदास्ते। एवं पौरुषेयवचनानां तात्पर्यनिर्णयाधीनतया अर्थ बोधकत्वात् तात्पर्यस्य च वक्तृबुद्ध्यधीनत्वात् वक्तृबुद्धेश्चानुमानाधीन त्वात् अनुमानाधीनमेव लौकिकवाक्यानां अर्थबोधकत्वमित्यप्रकम्प्यम्। ततश्च, 'गामानये' ति वाक्ये श्रुते, पदार्थयोश्च पृथक् पृथक् स्मृतयोः एवमनुमिनोति, एते पदे अनयोः पदार्थयोः संसर्गं ज्ञात्वैव प्रयुक्ते, आप्तप्रणीतपदत्वात् घटमानयेति पदवत् इति। अतः नरवचस्सु अनुमेय एव वाक्यार्थ इति। एवं व्यभिचारशंकानिवृत्तौ जातायां वाक्यार्थ-निर्णये च जाते शब्दोऽपि अनुवादात्मकतया तमेवार्थं पुनरभिधत्ते इति।

तदिदं न युक्तम्। अनुमाने आप्तप्रणीतत्वं हि हेतुत्वेनोक्तम्। आप्तत्वं नाम भ्रान्त्यादिरहितत्वम्। भ्रान्तिश्च वाक्यप्रयोक्तुः पुरुषस्य क्वचिदपि नैवेति नैव वक्तुं शक्यते। यदि ऋषीणां अपि भ्रान्तिरा शङ्क्यते, तर्हि का कथा अन्येषामर्वाचीनानाम्। तस्मात् अस्मिन् वाक्यार्थे अस्य भ्रमो न इत्येव हि वक्तव्यम्। तथा च वाक्यार्थज्ञानपुरस्सरमेव हि भ्रान्तिर्निवारणीया। एवं च वाक्यार्थाधिगमात् पूर्वं आप्तत्वमेवा

सिद्धमिति कथमसिद्धेन हेतुना वाक्यार्थानुमानमिति भवन्त एव विभावयन्तु ।

पौरुषेयवचनानां अनुमानत्ववारणदेव सर्वशाब्दानुमानत्ववादिनोऽपि शाक्याक्षपादादयो दूरतो निरस्ताः। तथा हि निर्दोषवाक्यत्वादिहेतुभिरेव वाक्यार्थो अनुमेयः स्यात्। निर्दोषत्वं नाम भ्रान्त्यादिशून्यत्वं, तच्च पूर्वोक्तविधया वाक्यार्थनिरूपणाधीननिरूपणमिति पूर्वोक्तहेत्वसिद्धिरूपो दोषः तेषामपि समः ।

किंच पदार्थज्ञानं पदैर्जायमानं अवगतार्थविषयत्वात् प्रमाणमेव नेति तस्य अनुमानात् भेदाभेदपरीक्षा तावद्विफलैव। यत्तु वाक्यार्थज्ञानं तद्धि अगृहीत संबन्धैरेव पदार्थैः जायमानं नानुमानशङ्कामप्यर्हति । अनुमानेसंबन्धग्रहणस्य (व्याप्तेः) नियमेनापेक्षणात्। न हि सर्वैर्वाक्यार्थविशेषैः संबन्धग्रहणसंभवः अनन्तत्वात्। किंच अत्यन्तं अपूर्वोऽपि वाक्यार्थविशेषः पदार्थैः उपजायते दूरदेशवार्तासु। तत्र व्याप्त्यादेः प्रसक्तेरेवाभावात् नानुमानमिति 'अस्येदं कारणं कार्यं संबन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम्' इति अनुमानलक्षणमभिधाय 'एतेन शाब्दं व्याख्यातम्' इति वादिनां औलूक्यानां मतमयुक्तमेवेति सिद्धम्।

तदेवं लौकिकं वैदिकं च शाब्दं अतिरिक्तप्रमाणमिति तावत् सिद्धम्। तत्र लौकिकवाक्यानां वक्तृप्रणीतत्वात् पुरुषगतदोषाः शब्देऽपि संक्रान्ताः प्रामाण्यव्यभिचारं आपादयेयुः कामम्। अपौरुषेयवेदवाक्येषु तु पुरुषसंबन्धाधीनदोषाणां प्रसक्तेरेवाभावात् प्रामाण्यव्यभिचारशंकाया अपि नैवावसर इति प्रामाण्यं निष्प्रकम्प्यमेव। वैदिकं च विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पञ्चधा विभक्तम्। तत्र 'वायव्यं श्वेतमालभेत' स्वाध्यायोऽध्येतव्यः इति लिङादिघटितं (पुरुषप्रवर्तक वाक्यं) विधिः। 'वर्हिर्देवसदनं दामी' त्यादयो मन्त्राः। ते च प्रयोगसमवेतार्थस्मारकाः। नामधेयं च अग्निहोत्रोद्भिच्चित्राश्येनादि

पदानि। तेषां च विधेयार्थपरिच्छेदकतया अर्थवत्त्वम्। निषेधः अनिष्टादि साधनकर्मणो पुरुषस्य निवृत्तिबोधकवाक्यं, यथा 'न कलञ्जं भक्षयेत्' न तौ पशौकरोति इत्यादिकम्। अर्थवादः, प्राशस्त्याप्राशस्त्यान्यतरप्रतिपादकवाक्यानि ' यथा—वर्म वा एतद्यज्ञस्य क्रियत यत् प्रयाजानूयाजा इज्यन्ते, वर्मयजमानस्य भ्रातृव्याभिभूत्यै। पुराऽस्य संवत्सरात् गृहे रुदन्ति इति। एतद्विस्तरस्तु उत्तरत्र भविष्यति। सर्वथा शब्दस्य अतिरिक्तप्रमाणत्वं तावत् सिद्धम्।

॥ इति शास्त्रालोके तृतीयोल्लासः ॥

॥ अथ उपमाननिरूपणम् ॥

'उपमानमपि सादृश्यमसन्निकृष्टे अर्थे बुद्धिमुत्पादयति। यथा गवयदर्शनं गोस्मरणस्य' इति भाष्यम्। पूर्वदृष्टे स्मर्यमाणे अर्थे दृश्यमानार्थप्रतियोगिकसादृश्यज्ञानम्। यथा गवये गोसादृश्यदर्शनानन्तरं स्मर्यमाणे गवि दृश्यमानगवयसादृश्यज्ञानं यज्जायते तदुपमानमित्यर्थः। इदं चातिरिक्तं—कथं? नगरे हि पूर्वं गां पश्यतः तस्य गवयसादृश्यं नैवावभासते। प्रतियोगिनः गवयस्यादर्शनात्। गां दृष्टवतः पुरुषस्य वने गवयदर्शनानन्तरं तत्र गोसादृश्यं ज्ञायते। इदं च प्रत्यक्षम्। अनन्तरं नगरस्थे गवि गवयसादृश्यं भाति। तत्र कारणं किमिति विचारे, न प्रत्यक्षं, गोः दूरस्थत्वात्, इन्द्रियसन्निकर्षाभावाच्च। नापीदं स्मरणं, गवयसादृश्यस्य गोनिष्ठस्य पूर्वमननुभवात्, नापि। अनुमानं, पक्षवृत्तित्व सपक्षवृत्तित्व विपक्षावृत्तित्वादेर्लिङ्गे अग्रहात्। अतः प्रमाणान्तरमेवेदं इति। तत्र च गवयस्थित गोसादृश्यज्ञानं कारणं, फलं तु गोगतगवयसादृश्यज्ञानं इत्यपि विभाव्यम्।

तार्किकाश्च गोगतसादृश्यज्ञानं अनुमित्यैव प्रमीयते इति वदन्ति। गौर्गवयसदृशः गवयसादृश्यप्रतियोगित्वात्, यो यद्गतसादृश्यप्रतियोगी

स तेनापि सदृशः, यथा हस्तः हस्तान्तरेण। गवयगतसादृश्य प्रतियोगी च गौः, तस्मात् गवयेनापि सदृशः इति। इदं च न शोभते। सादृश्यसामान्यस्य सामान्यव्याप्तिमात्रेण यः कश्चित् वह्निः वर्तते इतिवत् भानेऽपि नियततया गोः गवयसादृश्यं विस्पष्टं अनुमानेन न भासेत, अतः नियतपरिच्छेददर्शनात् न सामान्यतो दृष्टानुमानमिति प्रमाणांतरमेवेदं।

तार्किकैस्तु उपमानमन्यथा त्वुन्नीयते—"यथा कश्चन नागरिकः वनादागतं पृच्छति 'गवयः कः' इति। तेन च वनचरेण गोसदृशो गवयः इत्युत्तरिते श्रुतातिदेशवाक्यः कदाचित् वनं गतः नागरिकः मृगविशेषं गोसदृशं पश्यति। अयमेव स गोसदृश इति प्रत्यभिजानाति। अनन्तरं अयमेव गवय इति संज्ञासंज्ञिसंबन्धमपि जानाति। तदिदं संगतिग्रहणमेवोपमितिः। तत्करणं वाक्यार्थज्ञानमुपमानमिति"। इति। अत्रेदं वक्तव्यं —को गवयः? इति गवयशब्दाभिधेयार्थं पृच्छन् हि पुरुषः वनचरात् 'गोसदृशो गवयः' इति उत्तरवाक्यं श्रुत्वा वनचरोक्त वाक्यस्य वाच्यार्थप्रदर्शनपरत्वमेवेति हि निश्चिनोति।

तेनाप्रदर्श्य वाच्यार्थं न शब्दः पर्यवस्यति। पूर्वं च गवय-ज्ञानात् न शक्यं तत्प्रदर्शनम्। ततश्च यावत् गवयस्य प्रत्यक्षं न भवति तावत् वनचरवाक्यस्य तात्पर्यमपर्यवसितं च सत् गवये प्रत्यक्षी क्रियमाणे च स्मृतिगतं तदतिदेशवाक्यं प्रत्यक्षोपदर्शितवाच्यार्थपरतया प्रतिलब्धतात्पर्यं तदैव संज्ञासंज्ञिसंबन्धस्य बोधकं भवति। एवं चेदं संगतिग्रहणं प्रत्यक्षानुगृहीतशब्दसाध्यं भवतीति न प्रमाणान्तर-मन्वेषणीयमिति तार्किकमते असंकीर्णोपमानात्मकप्रमाणासिद्धिरेव। सिद्धान्ते तु स्वेतरप्रमाणाविषयगोगतसादृश्यबोधस्यैव उपमान-प्रमेयत्वात् अतिरिक्तप्रमाणसिद्धिः सुलभा। किं च उपमानपदं

लोके सादृश्ये सत्येव प्रसिद्धम्। नान्यथा, वैधर्म्ये, धर्ममात्रे च तत्प्रयोगः इति तार्किकोक्तिस्तु विचित्रैवेत्यपि बोध्यम्।

प्राभाकरास्तु सादृश्यं पदार्थान्तरमेवेति मन्यन्ते। भाट्टास्तु गुणान्तर्भावमाचक्षते एततद्विस्तरस्तु उत्तरत्र भविष्यति।

॥ इति चतुर्थोल्लासः ॥

॥ अथ अर्थापत्तिनिरूपणम् ॥

'"अर्थापत्तिरपि दृष्टः श्रुतो वा अर्थो अन्यथा नोपपद्यत इत्यर्थ कल्पना" इति भाष्यम्। अन्यथानुपत्तया यदुपपादकार्थकल्पनम् तदर्थापत्तिरिति तदर्थः। साधारणप्रमाणनां असाधारणप्रमाणे विरोधे सति अविरुद्धांशे यत् ज्ञानं तदर्थापत्तिरिति ज्ञेयम्। यथा— गणितागममूलेन अनुमानेन देवदत्तो गृहे बहिर्वा क्वचित् वर्तत इति साधारण्येन अवगतम्। तस्य च देवदत्तस्य विशेषतया 'गृहे नास्तीति यदावगतं तर्हि एतदविरोधाय बहिरस्तीति परिकल्प्यते इति। ननु अनुपपन्नादुपपादककल्पनमर्थापत्तिः इति किल पर्यवसन्नं, तथाचेत् अनुमानमेव भवेत्, तत्रापि हि विना वह्निमनुपपन्नात् धूमात् वह्नेः परिकल्पनस्य समत्वात् इति चेत्, स्यादेवं यद्यनुपपन्नं गमकं स्यात्, अर्थापत्तौ हि अनुपपन्नं हि गम्यं भवति, गृहाभावेन विना बहिर्भावो नोपपन्नः स एव च गम्यः। अतः महदिदं वैषम्यम्। अथस्यात् उपपादकादनुपपन्ने अर्थे बुद्धिः अर्थापत्तिः इति यदि स्वीक्रियेत, तर्हि वृक्षत्वदर्शनेन शिंशपात्वमपि परिकल्प्येत वृक्षत्वस्य शिंशपात्वोपपादकत्वात्, न हि वृक्षत्वं विना शिंशपात्वं नाम परिदृश्यते' अतः अनुपन्नमेव गमकं नोपपादकं, एवं चोक्तानु मानान्तर्भावः नैव वारयितुं शक्यते इति। न स्यात्, अविनाभावेन

अनुपपत्तिरिति नोच्यते, किंतु संशयापत्तिः, यस्य च देवदत्तस्य जीवनं गृहसंबन्ध्येव प्रायशो अवगतं, तस्य इदानीं गृहाभावे दृष्टे जीवनं संशयविषयभूतं बहिर्भावमवकल्पयति । तेन च बहिर्भावेन कल्पितेन संशयनिवृत्तिः । एवं च बहिर्भावकल्पनायाः प्राक् जीवनस्य संदिग्धत्व त्वान्नलिङ्गत्वम् । न हि अनुमाने कुत्रचित् संदिग्धं लिङ्गं परिदृश्यते । न गृहाभावमात्रं (जीवनरहितं) लिङ्गं भवति । मृतेऽपि संभवात् । अतः प्रमाणान्तरमेवेदम् । यथा निश्चितस्यैव गमकत्वं अनुमाने, तथा संदिग्धस्यैव गमकत्वमर्थापत्तौ इति दर्शनबलादुपपद्यते ।

ननु यदुक्तं संदिग्धं जीवनं बहिर्भावं कल्पयतीति तदिद-म युक्तमिव, न हि भवति जीवति वा मृतो वा देवदत्तः इति संदिहानः पुरुषः जीवतिना देवदत्तस्य बहिर्भावं कल्पयतीति । न हि दृष्टमिदं लोके यत् भावाभावसंदेहस्य बहिर्भावकल्पनया निराकृतिस्संभवार्हेति । अतः गृहाभावाख्यं जीवनसंसृष्टं लिङ्गं बहिर्भावव्याप्तिकं अन्यत्र दृष्टमिति अत्रापि गृहाभावाख्यं जीवनसहितं लिङ्गं दृश्यमानं बहिर्भावाख्यं साध्यं साधयेदिति कुतो वा अनुमानाद्बहिर्भावस्तस्येति चेत् ।

ब्रूमः । जीवनसंसृष्टस्य गृहाभावस्य लिङ्गत्वमिति भवताप्यभ्युपगतं तत्र लिङ्गज्ञानानन्तरमेव लिङ्गिज्ञानमिति सर्वैरप्येषितव्यम् । न हि लिङ्गज्ञानलिङ्गिज्ञानयोः एककालिकता, अनुभवविरोधात् । प्रकृते च बहिर्भावज्ञानमन्तरा जीवनं गृहाभावश्च न परस्परं संसृष्टतया ग्रहीतुं शक्यते विरोधात्, कथमिति चेद्ब्रूमः, जीवता पुरुषेण गृहे वा बहिर्वा वर्तितव्यमिनि निश्चितं, एवं च प्रकृते बहिर्भावमनन्तर्भाव्य जीवनगृहाभावयोः समुच्चित्य ग्रहणं नाम ,देवदत्तः गृहे अनवस्थित गृहे बहिर्वा अवस्थित इति । नेदं दृष्टचरं नाम । भावाभावयो रेकदेशावच्छेदेन समुच्चयादर्शनात् । ततश्च देशभेदेनैव देवदत्तस्य

भावाभावाववगन्तव्यौ । ततश्च देवदत्ते भावाभावयो रसंसर्गग्रहण-वेलायामेव बहिर्भावस्य अनुमानप्रमेयस्य देवदत्ते अवगतत्वात् नानुमानप्रमेयं किञ्चिदिति, नात्रानुमानप्रसरः । उक्तं च वार्तिककारैः—

विद्यमानत्वसंसृष्टगृहाभावधिया नया ।
गेहादुत्कालिता सत्ता बहिरेवावतिष्ठते ।। इति ।

ननु भवत्वर्थापत्ति प्रमाणं, अनुमानस्य तु अर्थापत्तेरतिरिक्तप्रमात्वे नैव-गमकं किंचित्, तथा हि यत्रयत्र धूमः तत्र अग्निरित्यवगतं, पर्वतस्य च धूमवत्वं प्रत्यक्षेणावगम्यते यद्यस्मिन् पर्वते वह्निर्नस्यात् तदा तस्य धूमवत्वं मिथ्या भवेत्, अथवा धूमाधिकरणानां सर्वेषां अग्निमत्वं वा मिथ्या भवेत्, अतः तदुभयमपि यथा न मिथ्या भवेत् तदर्थं अग्निः परिकल्प्यते इति अर्थापत्तिरेवेयमिति । अतः नानुमानस्यातिरिक्तं प्रमाणत्वमितिचेत्—

सर्वधूमवतां चाग्निसंबन्धो ह्यनुमानतः ।
नैव तस्याप्रमाणत्वे प्रोक्तार्थापत्ति संभवः ।।

धूमवतां सर्वेषामग्निमत्वं अनुमानादन्येन प्रमाणेन नैव सिद्धयति । दृष्टान्तेतु तन्मात्र एव प्रत्यक्षेण अग्नि संबन्धोह्यवगतः । न सर्व-धूमाधिकरणेषु, तेषामिन्द्रियासन्निधानात् । अनुमानात्तु सर्वधूम-वतामग्निसिद्धिरिति तु युक्तम् । अतः असंकीर्णविषयत्वादनुमान-मपि प्रमाणान्तरम् ।

सा चेयमर्थापत्तिः दृष्टार्थापत्तिः, श्रुतार्थापत्तिश्चेति द्विविधा, पूर्वप्रदर्शितमुदाहरणं दृष्टार्थापत्तेः ।

असंपूर्णस्य वाक्यस्य त्वन्वयार्थं प्रकल्प्यते ।
पदस्याध्याहृतिर्यत्र द्वितीया तत्र चेष्यते ।

यथा 'द्वारं द्वारं' इत्यादौ परिपूर्णार्थप्रतिपादनाय 'संव्रियतां' इत्यादि शब्दान्तरं श्रुतद्वारशब्दैकवाक्यत्वेन कल्प्यते, एवं वेदेऽपि "विश्वजिता यजेते" इत्यादौ स्वर्गकामः इति वा स्वर्गार्थमिति वा येन श्रुतवाक्यैकशेषभूतेन परिपूर्णार्थाभिधानं भवति वाक्यं, तस्य शब्दस्य परिकल्पनमिति ।

प्राभाकरास्तु तत्राहुरर्थाध्याहारमेव हि ।
नैवं श्रुतार्थापत्तिःस्यात् संमता तन्मते ततः ॥

इदं तु न युक्तं, न हि शाब्दमशब्देनान्वेतीति न्यायविरोधात् । न च स न्यायो नैवाङ्गीक्रियतेतिवाच्यम् ऊहाध्यायविरोधात्तेः । 'अग्नये त्वा जुष्टं निर्वपामि' त्यादिमन्त्रेष्वपि सौर्यादिविकृतियागेषु सूर्यादिरूपार्थ एव ऊहितव्यः न तु पदकल्पनं इत्यापातात् । एतद्विस्तरस्तु असदीये श्लोकवार्तिकभूषणे अभावपरिच्छेदेऽवगन्तव्यः ॥

। इति शास्त्रालोके अर्थापत्तिनिरूपणंनाम पञ्चमोल्लासः ।

॥ अथ अभावनिरूपणम् ॥

"अभावोऽपि प्रमाणाभावो नास्तीत्यर्थस्यासन्निकृष्टस्ये" ति भाष्यम् । नास्तीत्ययमर्थः प्रमाणाभावात्मकेन अभावप्रमाणेन अवगम्यते, अतः अभावोऽपि प्रमाणमित्यर्थः । ननु किमिदं व्याहतं वचः, प्रमाणाभावः प्रमाणमिति, न, पूर्वोक्तभावपदार्थोपलंभक प्रत्यक्षादिप्रमाणपञ्चकाभिप्रायोऽयं प्रमाणशब्दः तदभावः षष्ठं प्रमाणमिति लक्षणनिष्कर्षः । अस्य प्रमेयं तु नास्तीत्यर्थः, अत्र चानुपलंभः करणम् । तस्य च ज्ञानाभावरूपतया अभावः प्रमाणमित्युच्यते । अयमेव च योग्यानुपलंभः इति भण्यते । योग्यता च विषयभूत

घटादिकं, तदधीनेन्द्रियसन्निकर्षादींश्च विना यद्यत् घटोपलंभकारणं, नाम, चक्षुरुन्मीलनालोकसमवधानमनःप्रणिधानायिकं, तत्समवधानम् । तत्सहकृतः घटानुपलंभो घटाभावं बोधयतीति । अयं भावः, सर्वं हि लोके वस्तु सद्रूपेण असद्रूपेण च द्विविधम् । तत्र यत्र सद्रूपेण वर्तते घटादि, तत् प्रत्यक्षादिना अस्तीति प्रतीयते ; यत्त्वसद्रूपेण वर्तते तत्र सद्रूपेण ग्राहकाणां प्रत्यक्षादीनां सद्रूपबोधनाय उत्पत्तुं योग्यतायां सत्यामपि योऽनुदयः दृश्यादर्शन, योग्यानुपलंभादि पदवाच्यः पूर्वोक्तलक्षणभाष्ये च प्रमाणाभावशब्देन निर्दिष्टः स एव इन्द्रियशब्दादिस्थानमापन्नः नास्तीत्यमुमर्थं बोधयतीति । पूर्वोक्तयोग्यतायाः सन्देहे वा विपर्यासे वा अभावेऽपि सन्देहो विपर्यासो वा भवत्येव ।

यथा कश्चन पुरुषः भ्रष्टमङ्गुलीयकं स्वकराभ्यां अन्विष्यन् सर्वभूमिस्पर्शं संदिहानः अङ्गुलीयाभावेपि संदिग्धो भवतीति । एवं सर्वं भूमिभागमस्पृष्ट्वैव एवं मनुते मया सर्वेऽपि भागो अन्वेषित इति तदा सत्यप्यङ्गुलीयके नास्तीति मनुते । विपर्यासस्य कारणं योग्यताविपर्यास एव हि । अतः योग्यतानिश्चयः सहकारी ।

अभावप्रमां प्रति कारणभूतश्चानुपलंभः द्विविधः, प्रमाणाभावः स्मरणाभावश्च, तत्र घटाद्यभावज्ञानं प्रत्त्यक्षप्रमाणाभावारूपादनुदलंभात् । एवं 'प्रातरिह गजो नासीदि'ति सायंकाले यत्ज्ञानं तत् स्मरणाभावात् । तत्र प्रातःकालावच्छिन्नस्य गजस्य सायंकाले दर्शनयोग्यत्वाभावात् स्मरणयोग्यतायां सत्यामप्यस्मरणमेव तत्र प्रातःकालावच्छिन्नगजाभावबोधकतया आश्रीयते । इति

एतेन अभावस्य प्रत्यक्षादिगम्यत्वं वदन्तः योग्यानुपलब्धिगम्यतां चासहमानाः तार्किकाः प्रत्युक्ताः । सायंकाले प्रातःकालीनाभावज्ञानस्य इन्द्रियजन्यत्वासंभावात् अनुपलब्धिजन्यत्वमेव हि

तैरकामैरप्यश्रयणीयम्। न च स्मरणाभावरूपलिङ्गेन प्राक्‌ कालावच्छिनाभावो अनुमीयेतेनि वाच्यम्। ज्ञानस्याप्रत्यक्षत्वात् मानस प्रत्यक्षगम्यत्वमपि ज्ञानानां न संभवतीति तदभावोऽपि मनसा नैव गृहीतुं शक्यते इति। एतद्विस्तरस्तूत्तरत्र भविष्यति।

ननु अभावस्य प्रत्यक्षत्वं अनुमानात्साधयामः, उक्तं चोदयनेन यथा—

प्रतिपत्तेरापरोक्ष्यात् इन्द्रियस्यानुपक्षयात्।
अज्ञातकारणत्वाच्च भावावेशाच्च चेतसः॥ इति।

प्रयोगश्च, अभावः प्रत्यक्षः अपरोक्षप्रतीतवत्वात् घटवत् इति। इति चेत्; न, भूतलादेः अपरोक्षत्वादेव अभावस्यापरोक्षत्व प्रतीतिरिति भ्रान्तिः। न त्वभावस्यापरोक्षत्वं, रूपाद्यभावात्। अतः स्वरूपासिद्धिः हेतोः। एवमुदयनोक्तद्वितीय हेतु रप्यसिद्धः एवं हि तदा प्रयोगः—अभावज्ञानं अपरोक्षं अनुप क्षीणेन्द्रियजन्यत्वात्, घटज्ञानवत् इति। तत्र इन्द्रियाणां अभाव प्रमां प्रति कारणीभूतयोग्यतासिद्धावेवोपक्षीणत्वात् अभावं प्रति इन्द्रियव्यापाराभावात्। इष्यते च तार्किकैरपि अभावप्रमां प्रति योग्यताया हेतुत्वम्। यद्यत्र घटः स्यात् तर्हि चोपलभ्येत भूमिवत् इति तर्कात्मना योग्यताया तैरपि स्वीकारात् अतः अनुपक्षीणेन्द्रिय जन्यत्वं अभावज्ञानस्य न, अपि तु योग्यताग्रहण एवेति विशेषासिद्धत्वं हेतोः। एवं तृतीयोहेतुरप्यनैकान्तिकः—अभाव ज्ञानं प्रत्यक्षं अज्ञातकारणत्वत् 'घटादिज्ञानवत्' इति किल तदाप्रयोगः, संस्काराणां अज्ञातानामेव अवबोधकानां स्मृतिं प्रति हेतुत्वात् स्मृतेश्चा प्रत्यक्षत्वात् व्यभिचरितत्वं हेतोः।

चतुर्थोऽपि हेतुः सत्प्रतिपक्षितः। अभावज्ञानं भावरूपकरणाविष्ट मनोजन्यं ज्ञानत्वात् अन्यज्ञानवत्, इति हि प्रयोगस्तत्राभिमतः, तत्र

अभावज्ञानं इन्द्रियभिन्नकारणकं, अभावज्ञानत्वात्, अनुमेयाभावज्ञानवत् इति प्रतिप्रयोगस्य जागरूकत्वात् । अतः उदयनोक्तहेतवस्सर्वेऽप्य सिद्धिग्रस्ताः, इति न अभावस्य प्रत्यक्षता कथमपि ।

यदपि चोच्यते-चक्षुरादि अभावग्राहकं, इन्द्रियत्वात्, मनोवत् इति, तदपि इन्द्रियैस्संबद्धस्यैव इन्द्रियैः ग्रहणात् अभावेन संबन्धस्य कस्याप्यनंगीकरणात् विशेषविरूद्धत्वमिति अयुक्तम् । ननु विशेणविशेष्यभावः संबन्धः जागर्तिहीति चेत्, न, विशेषणविशेष्यभावोह्यन्यत्र स्वभिन्नसंबन्धान्तरपूर्वक एव दृष्टः, अत्र च तदभावादसिद्धता । अभावभूतले विशेषणविशेष्यभावरहिते संबन्धान्तररहितत्वात् मेरुविन्ध्यवत् इति प्रयोगेण विशेषणविशेष्यत्वमसिद्धमिति बोध्यम् । किं च सर्वेष्वपि पूर्वोक्तप्रयोगेषु इन्द्रियसंबन्धयोग्यत्वं उपाधि (प्रत्यक्षत्वे) रिति व्याप्त्यसिद्धिश्च । अपि च अभावज्ञानं न निर्विकल्पकप्रत्यक्षरूपं, प्रतियोगिस्मरणाधीनत्वात् । अतः सविकल्पकरूपमेव तदित्यङ्गीकार्यं, तत्र च निर्विकल्पानर्हस्य प्रत्यक्षत्वमेव न दृष्टं यथा अतीन्द्रियस्य वस्तुनः इति अभावः न नैयायिकरीत्या प्रत्यक्षगम्य इति । अपि तु अनुपलब्धिरूपप्रमाणगम्य एवेति ।

यत्त्वत्र कैश्चिदुक्तम्—लोके हि दृश्यस्य सद्भावः दर्शनेन व्याप्तः, यथा घटादिसद्भावः तद्दर्शनेन । व्यापकीभूतदर्शननिवृत्तौ च व्याप्यस्य दृश्यस्यापि निवृत्तिः यथा अग्न्यादेर्निवृत्तौ धूमादेरपि निवृत्तिरिति । अतश्च प्रकृतेऽपि अभावस्यापि निवृत्तिरिति । तदिदमयुक्तं—

व्यापकनिवृत्त्या व्याप्यनिवृत्तिः अनुमीयते इति वदता नूनं सपक्षे कुत्रचित् निवृत्तिद्वयं गृहीत्वा तयोः व्याप्तिं च गृहीत्वा पक्षेच साध्यवति दर्शननिवृत्तिरूपं च लिङ्गं केनचित् प्रमाणेन ज्ञात्वा अनन्तरं दृश्यनिवृत्तिः इति हि वक्तव्यम् । तत्र निवृत्तेश्च अभाव-

रूपत्वात् न प्रत्यक्षेण ग्रहणम् । निवृत्त्यन्तरेण तदनुमाने वा अनवस्था अपरिहार्या भवेत् । अतः क्वचित् प्रमाणान्तरभूतया अनुपलब्ध्यैव अभावो ग्राह्य इति अकामेनापि स्वीकर्तव्यम् । ज्ञाते तस्मिन् भवत्वनुमानम् । सिद्धं तावदभावस्य प्रमाणान्तरत्वमिति ।

ननु सर्वस्य प्रमाणस्य भावरूपत्वेनैव उपलंभात् कथं अभावस्य प्रमाणत्वेन स्वीकरणमितिचेत्, उच्यते, भावे प्रमेये हि भावरूपमेव प्रमाणम्, अभावे प्रमेये तु अभावरूपमेव तदिति का हानिः ? प्रमेयानुरूपत्वात् प्रमाणाङ्गीकरणस्य । उक्तं च—

भावात्मके यथा मेये नाभावस्य प्रमाणता ।
तथैवाभावमेयेऽपि न च भावप्रमाणता ॥
भावात्मकस्य मानत्वं न च राजाज्ञया स्थितम् ।
परिच्छेदफलत्वात्तु, प्रामाण्यं स्यात् द्वयोरपि ॥ इति

यानि त्वधिकानि प्रमाणानि, संभवैतिह्य, प्रतिभा, लोकप्रसिद्धिरूपाणि, तेषु संभवस्य सहस्रादितः शताद्यवगतिरूपस्य अविनाभावहेतुकस्य अनुमाने अन्तर्भावः । ऐतिह्यस्यापि 'इह वटे यक्षः तिष्ठति, इत्यादेः आगमे अन्तर्भावः । प्रतिभायास्तु 'श्वस्ते पिता आगन्ता' इत्यादेः लिङ्गाभासजातत्वात् अप्रमाणत्वमेवेति । लोकप्रसिद्धेस्तु प्रत्यक्षाद्यन्तर्भाव एव यथासंभवमिति न अधिकप्रमाणसद्भावावश्यकता । अतः पूर्वोक्तानि षडेव प्रमाणानि इति अविचाल्यः जैमिनीयसिद्धान्तः ॥

उक्तं च रामायणेऽपि वाल्मीकीये अरण्यकाण्डे—"राम षड्युक्तयो लोके याभिः सर्वोऽनुदृश्यते" इति (७२-स-श्लो ८)

प्रत्यक्षो योगिनां यस्त्वनुमितिविषयस्तार्किकाणां मते यः
वेदैः सर्वैश्च गम्यः सकलभयहरः स्वोपमा यः स्वयं स्यात् ॥

अर्थापत्त्याऽपि यस्मिन्नवगतिरुचिता सुस्थिते: सद्गुणानां
दोषाश्चाभावगम्या: स्युरिति निगदितं, श्रीहयास्यं नमाम: ॥

इति श्री भारद्वाजकुलतिलक श्री वरदाचार्यकृतिषु
शास्त्रालोके प्रमाणनिरूपणं नाम प्रथमोभाग: ॥

॥ शास्त्रालोके द्वितीयोभाग: ॥

नत्वा लक्ष्मीहयग्रीवमप्रमेयं श्रुतेरपि ।
कुमारिलमते सिद्धं प्रमेयमभिदध्महे ॥

तत्र तावत् कुमारिलमता: द्रव्य, जाति, गुण, क्रिया, अभावरूपा: पञ्चैव पदार्था: परिदृश्यन्ते । परिमाणगुणाधारत्वं द्रव्यस्य लक्षणमिति विज्ञेयम् । इदं च द्रव्यं, १) पृथिवी, २) आप:, ३) तेज:, ४) वायु:, ५) तम:, ६) आकाश:, ७) काल:, ८) दिक्, ९) आत्मा, १०) मन:, ११) शब्द:, इत्येवं एकादशविधं भवति । क्रमेणैतेषां लक्षणानि विभागं च संग्रहेणाभिधास्यामहे ।

१) तत्र गन्धवत्वं पृथिव्या: लक्षणम् । सा च महीमहीधरादिरूपा शरीरघ्राणेन्द्रियरूपाचेति ज्ञेया ।

२) स्वाभाविकद्रवत्वाधिकरणत्वं सलिलस्य लक्षणम् । तच्च सरित्समुद्रादिरूपं रसनेन्द्रियरूपं च ।

३) उष्णस्पर्शाश्रय: तेज: । तच्च सूर्यचन्द्राग्निनक्षत्ररूपं रूपग्राहकनयनरूपं च ।

४) अरूपत्वे सति स्पर्शवत्वं वायो: लक्षणम् । सोऽपि मन्दवातनि:श्वासवातादिरूप: स्पर्शग्राहकत्वगिन्द्रियरूपश्च, निरूपितेषु

चतुर्ष्वपि भूतेषु इन्द्रियरूपाणां भूतानां अर्थापत्तिगम्यत्वमेव, न तु प्रात्यक्षिकता ।

पृथिव्यप्तेजांसि प्रत्यक्षाण्येवेत्यत्र न संशयः । वायुश्चानुमेय इति तार्किकाणां वादः । लिङ्गं च तत्र अनुष्णाशीतस्पर्शः इति ते वदन्ति । इदं च तेषामनुमानं—योयं वायौ वाति, अनुष्णाशीतस्पर्शः उपलभ्यते स क्वचिदाश्रितः, गुणत्वात् रूपवत्, इति । स च आश्रयः न नभः, अस्पर्शत्वात् तस्य, नापि जलतेजसी, तयोः शीतोष्णस्पर्शाधारत्वात्, नापि पृथिवी, उद्भूतरूपवत्वनियमात् । अतः परिशेषात् वायुः सिध्यतीति तार्किकाः मन्यन्ते । स्पष्टं चेदं दीपिका, नीलकण्ठप्रकाशिकादौ । इदं च न युज्यते—

शीतादिषु स्पर्शेषु उपलभ्यमानेषु, शीतोः वायुः, उष्णश्च, इति स्पष्टं वायोरेकस्यैव प्रत्यभिज्ञया, कृष्णो घटः, श्वेतो घटः, इत्यादाविव अनेकरूपाधारं घटं, सकलस्पर्शाश्रयमेकं वायुं जानन्तः स्पर्शएवास्माकमुपलभ्यते न तदाधारो वायुः इति वदन्त अनुभवविरुद्धवादिन इति स्पष्टत्वात् ।

अतः त्वगिन्द्रियप्रत्यक्षो वायुः ।

तमसः लक्षणं तु नेत्रेन्द्रियमात्रग्राह्यत्वे सति आलोकाभावप्रकाश्यनीलरुपत्वमिति । तच्चेदं द्रव्यं गुणकर्माधारत्वात् । अत्र तार्किकाः 'आलोकाभाव एव तमः' इति वदन्तः अतिरिक्तद्रव्यत्वं नेच्छन्ति ।

इदंत्वयुक्तम्—तमः भावरूपं, गुणकर्माश्रयत्वात्, अस्तीति भानात् प्रतियोगिभानं विनैव भानाच्चेति । न च नीलरूपयुक्तस्य घटादेः भावस्य स्पर्शाश्रयत्वमपि हि दृष्टचरं, तमसि च स्पर्शाभावात् न रूपिद्रव्यं तमः इति वाच्यम् । एवं चेत् स्पर्शवतः द्रव्यस्य

सर्वस्य रूपित्वमपि दृष्टमिति वायोः रूपाभावात् अस्पर्शत्वप्रसंगात् । अतः तमः अतिरिक्तं द्रव्यमेव । अत एव 'यस्तमसि तिष्ठन्, तमः कृष्णं व्यक्तमास्थितः' इति श्रुतेः तत्प्रतिपाद्यनीलरूपस्यचोपपत्तिः ।

एतानि च पञ्च द्रव्याणि अवयविद्रव्याणि इति व्यवह्रियन्ते । अवयवाश्च परमाणवः । परमाणवश्च सिद्धान्ते जालरन्ध्रसूर्यमरीचिभास्यं सर्वतः सूक्ष्मतमं यत् दृश्यते द्रव्यं तद्रूपाः ।

तार्किकास्तु अस्मदादीनां अनुमानगम्यान् योगिनां प्रत्यक्षगम्यान् परमाणून् आश्रेरते । त्र्यणुकषष्ठोभागः परमाणुः इति च । तैरेव परमाणुभिः परमेश्वरः कुलाल इव मृदा घटं परमेश्वरः व्यणुकादिक्रमेण विश्वं सृजति इति च ते वदन्ति ।

वस्तुतस्तु त्र्यणुकत्वेन नैयायिकैः ये स्वीक्रियन्ते, त एव परमाणवः न तु तदतिरिक्ताः अतीन्द्रियाः केचन इति तु युक्तम् । प्रमाणाभावादनुपयोगाच्च । न च वातायनातपगतः पदार्थः (त्र्यणुकः) सावयवः, महत्वात् घटवत्' इत्यनुमानात् परमाणुसिद्धिरिति वाच्यम् । योग्यानुपलंभबाधितविषयत्वेन अनुमानाप्रसरात् ।

यच्चेदं उच्यते ईश्वरः परमाणुभिः जगत् सृजतीति, तन्न, ईश्वरसद्भावे वेदभिन्नस्य प्रमाणस्यासंभवात् वेदादेव तत्सिद्धेश्च ईश्वरोक्तत्वात् वेदप्रामाण्यमभ्युपगच्छतः नैयायिकस्य अन्योन्याश्रयत्वापत्तेश्चायुक्तत्वात् ।

ननु किमिदमुच्यते वेदातिरिक्तं प्रमाणं नास्ति ईश्वरसद्भावे इति । विद्यते हीदं प्रसिद्धमनुमानं—क्षित्यादिकं सकर्तृकं कार्यत्वात् 'घटवत्' इति चेत्, अनेनानुमानेन साध्यमानस्य ईश्वरस्य सपक्षसिद्ध कुलालादेरिव अल्पज्ञत्व सशरीरत्वाद्यापत्तेः अपरिहार्यत्वात्, अशरीरिणः

ईश्वरस्यासिद्धेः। वैयात्यात् अशरीरित्वाङ्गीकारे वा कर्तृत्वमेव तस्य न स्यात् अशरीरिणः कर्तृत्वस्यादृष्टेः कुत्रापि। किञ्च (पक्षे) क्षित्यादिकं इत्यनेन ईश्वरघटादिसंयोगः पक्षीक्रियते न वा। आद्ये भागासिद्धिः पक्षैकदेशस्यासिद्धत्वात्। एतदनुमानसिद्धपक्षीकरणे अन्योन्याश्रयणम्। अन्त्ये संदिग्धानैकान्तिकता। कार्यत्वात् सकर्तृकं इत्यत्र हेतोः व्यर्थविशेषणत्वं च। कार्यत्वस्य कृतिजन्यत्व रूपतया जन्यत्वमात्रेणैवोपपत्तेः। एवं आत्मत्वं क्षित्यादिकर्तृव्यक्ति-समवेतं न भवति जातित्वात्, घटत्ववत्, इत्यनेन प्रतिहेतुविरुद्धं च कार्यत्वम्। अतः नानुमानेन ईश्वरसिद्धिसंभवः। सिद्धान्ते-चैवमनुमानमुच्यते क्षित्यादयः कर्तृशून्याः शरीरिजन्यत्वाभावात् आत्मवत्, इति। एवमकर्तृत्वसाधनात् प्रपञ्चस्य आत्यन्तिकप्रलयोऽपि नैवाङ्गीक्रियते।

उक्तं च—"लोकस्यात्यन्तिको नाशः वैदिकानां न संमतः।
महतां वेदमार्गाणां स्रोतोभङ्गप्रसङ्गतः॥ इति।

॥ वेदापौरुषेयत्वसाधनम्॥

ननु किमिदमुच्यते वेदमार्गविच्छेदप्रसङ्ग इति सृष्टिकाले ईश्वरः वेदानपि विधास्यतीत्यङ्गीकारेण दोषाभावात्। वेदवाक्यानि, पौरुषेयाणि वाक्यत्वात्, भारतादिवत् इति प्रयोगाच्चेति चेत्।

अत्र ब्रूमः—लोके प्रमाणान्तराधिगतार्थबोधकेष्वेव वाक्येषु पुरुषाणां स्वातन्त्र्यं परिदृष्टमिति वेदप्रतिपाद्यार्थानां प्रमाणान्तरा-नधिगतार्थत्वात् न तत्प्रतिपादकवेदवाक्यानां पुरुषकृतत्वसंभवः। अतः पूर्वोपन्यस्त वेदपौरुषेयत्वानुमाने प्रमाणान्तरोपलक्ष्यमूलत्वं उपाधिः। सशरीरस्यैव पुरुषस्य वाक्यरचयितृत्वं दृष्टमिति

ईश्वरस्य पूर्वपक्षिसंमतस्य शरीररहितत्वात् हेतोर्विशेषविरुद्धत्वं च। एवं —विप्रतिपन्नः कालो न वेदशून्यः कालत्वात्, अद्यतनकालवत्। वेदाध्ययनं, परतन्त्राध्येतृकर्तृकं अध्ययनत्वात्, आत्मत्वं वेदकर्तृ-व्यक्तिसमवेतं न भवति जातित्वात् गोत्ववत् इत्यादि प्रतिहेतु-विरुद्धं च वाक्यत्वम्।

न चैवं भारतादीनामप्यपौरुषेयत्वापत्तिरिति वाच्यम्। तेषां कर्तृस्मरणस्य दृढत्वात्। तत्रापौरुषेयत्वसाधने बाधात्। अनुपलब्धार्थे अनिर्णीतार्थे वा न्यायप्रवृत्तिः, न तु उपलब्धार्थे इत्यस्य सर्वसंमतत्वात्। एतेन पूर्वोक्तवेदपौरुषेयत्वसाधकानुमाने स्मर्यमाणकर्तृकत्वं उपाधिः इत्यपि सूचितम्।

ननु वेदेष्वेव हि वेदस्य पौरुषेयत्वं श्रूयते, "तस्य वक्त्रेभ्यो वेदाः निःसृताः, त्रयो वेदा अजायन्त, अग्नेः ऋग्वेदः, वायोः यजुर्वेदः, आदित्यात् सामवेदः। तस्मात् यज्ञात् सर्वहुतः। ऋचः सामानि जज्ञिरे, इति। एवं काठकादिसमाख्यावशतोऽपि कठादि कर्तृकत्वमेव प्रतीयते इति कथं वेदविरुद्धमपौरुषेयत्वं वेदस्य उच्यते इति चेत्—

अभिधीयते—'आदित्यो यूपः' इत्यादिवत् वेदोऽपि न प्रमाणान्तरविरुद्धार्थप्रतिपादनाय प्रभवेदिति अर्थवादपरत्वमेव उत्पत्ति प्रतिपादकानां वेदवाक्यानां। अत एव 'तस्य निःश्वसितं वेदाः। इति अयत्नागतत्वश्रवणस्याप्युपपत्तिः। काठकादिसमाख्याया अपि कठादेः प्रकृष्टवचनतया तच्छिष्याणां 'कठानां अम्नायः' काठक-मित्यस्मिन्नर्थे वुञ्प्रत्ययविधानात् न कठादीनां स्वातन्त्र्येण वेदकर्तृत्व साधकत्वम्। अतो वेदवाक्यानां पुरुषसंबन्धाभावात् अप्रामाण्यस्य नैवावकाशः कथं चिदपीति॥

"ज्ञानानां स्वतः प्रामाण्य निरूपणम् ॥

ननु यदुक्तं वेदानामपौरुषेयत्वात् प्रामाण्यं सुदृढमिति, तत्रेदं ब्रूमः, गुणाधीनत्वात् प्रामाण्यस्य शब्दगुणानां च पुरुषगुणाधीनत्वात् पुरुषसंबन्धाभावे कथं वेदप्रामाण्यमिति। अतः अपौरुषेयत्वे स्वीकृतेऽपि अप्रामाण्यं तदवस्थमेवेति चेत् ॥

स्यादेतदेवं यदि गुणात् प्रामाण्यमिति स्यात्। न चैवमिष्यते सिद्धान्ते, गुणाभावेऽपि दोषाभावमात्रेण प्रामाण्योपपत्तेः। सर्वप्रमाणानां प्रामाण्यं स्वत एवेति युक्त्या भाष्यादौ विनिर्णयात्। यथा चक्षुरादीनां पित्तादिदोषदूषितत्वे शंखादौ पीतत्वादिज्ञानं, अभावे च दोषाणां यथावस्थितशौक्ल्याद्यवगमः, तथा ज्ञानानामपि स्वत एव प्रामाण्यं, अप्रामाण्यं तु दोषवशात् इति। कथमिदं युक्तं प्रामाण्यस्य स्वतः प्राप्तिरिति? तदर्थमिदं विचार्यते—किं ज्ञानानां प्रामाण्यमप्रामाण्यं चेत्युभयं स्वत एवेति, उतोभयं परतः, इति अप्रामाण्यं स्वतः, प्रामाण्यं परतः, आहोस्वित्, प्रामाण्यं स्वतः, अप्रामाण्यं परतः इति।

तत्र सांख्याः एवं वदन्ति—सर्वकारणानां स्वकार्यजनकत्व शक्तेः स्वाभाविकत्वात् प्रामाण्यमप्रामाण्यं चेत्युभयमपि ज्ञानानां स्वतएवेति। नैतद्युक्तं। न हि ज्ञानं स्वविषयस्य प्रामाण्यं (विषयतथात्वं) अप्रामाण्यं (अतथात्वं) च युगपदेवावेदयितुं शक्नोति। विरोधात् अतः द्वयमपि स्वभावेन, अनिरूपितं कारणगुणदोषज्ञानाभ्यां निश्चीयते इति उभयमपि परतः इति नैयायिकाः। इदमपि न युक्तम्। एवं चेत् गुणदोषावधारणात् प्राक् नैकेनाप्याकारेणार्थानवगमकं ज्ञानं निस्वभावमिति स्यात्। तच्च अनुभव विरुद्धम्।

बौद्धास्तु ममोत्पन्नं ज्ञानं प्रमा नवेति संदेहादेः दर्शनात् प्रामाण्यस्य स्वतस्त्वे च तदयोगात्, अप्रामाण्यं स्वतः प्रामाण्यं तु संवादज्ञानादिभ्यः अन्यत एवेति वदन्ति। तदप्ययुक्तम्। यदि सर्वमेव ज्ञानं स्वविषयतथात्वनिश्चये स्वयमसमर्थं सत् विज्ञानान्तरमपेक्षेत तर्हि निश्चायकगुणज्ञानानामपि प्रमाणभूतानामेव पूर्वज्ञानप्रामाण्य निश्चायकत्वात् तत्प्रामाण्यग्रहस्य ज्ञानान्तराधीनत्वे नैकस्मिन्नपि ग्रहणे जन्मसहस्रेणापि प्रामाण्यमध्यवस्येतेति जगदान्ध्यप्रसंगः। अथ अर्थक्रियाकारित्वज्ञानं पूर्वज्ञानप्रामाण्यनिश्चायकं स्वतः प्रमाणमिति चेत्, नियामकाभावात् नैवं संभवति, ज्ञानत्वाविशेषाद्वा पूर्वज्ञानमपि तथैव स्यात्। तस्मात् ज्ञानानां स्वतः प्रमाण्यं प्राप्तं अर्थान्यथात्वकारण-दोषज्ञानाभ्यामपोद्यत इति सिद्धं ज्ञानानां प्रामाण्यं स्वतएवेति। एवं च शब्दे स्वतो निर्दुष्टेपि पौरुषेयवाक्ये पुरुष संस्पर्शाधीनत्वात् दोषाणां संभवेऽपि अपौरुषेये च वेदे तदभावात् साक्षाच्चार्थान्यथात्व-ज्ञानाभावात् स्वाभाविकं प्रामाण्यं अनपोदितमिति वेदानां प्रामाण्य-मप्रकम्प्यमिति। एतद्विस्तरस्तु अस्मदीये श्लोकवार्तिकभूषणे चोदनासूत्रे अवगन्तव्यः।

एवं निरूपितानि तमःपर्यान्तानि पञ्चावयवद्रव्याणि। इदानीं आकाशादीनि चत्वारि अनवयवद्रव्याणि निरूप्यन्ते—तत्र वेदान्तिनः 'आत्मनः आकाशः संभूतः' इत्यादि श्रुत्युपष्टंभेन आकाशादीनाम-नित्यत्वं वर्णयन्ति। तत्तु न युज्यते। निरवयवद्रव्यत्वेन आत्मवदेवैषामपि नित्यत्वस्य अबाधितानुमानसिद्धत्वे श्रुतेर्यथाश्रुतार्थे प्रामाण्यानुपपत्तेः। एतानि च मनोभिन्नानि व्योमकालदिगादीनि प्रत्यक्षाणि। आत्मवदेवैतेषामपि 'कालदिगाकाशाः प्रत्यक्षाः अमनस्त्वे सति विभुत्वादिति सदनुमानेन प्रत्यक्षत्वसाधनात्। यदि चैतेषां प्रत्यक्षत्वं नस्यात् तर्हि एतेषां स्वरूपमेव हि न सिद्ध्येत्। न

तद्व्यतिरेकेणैतत्स्त्थापकप्रमाणा भावात् ।

अथ स्यात्—शब्दस्य गुणत्वात् गुणस्य च गुणिनमन्तरेण स्थातुमशक्तेः शब्दगुणाश्रयत्वेन लिङ्गेन आकाशः सिद्ध्येत् । एवं कालः युगुपदादि प्रत्ययेन, दिक् च पूर्वापरादिप्रत्ययेन चानुमीयेतेति प्रत्यक्षव्यतिरिक्तप्रमाणासिद्धिरिति नस्यात् ।

नस्यात् : शब्दस्य द्रव्यत्वेन गुणत्वाभावादेव आश्रयद्रव्यानपेक्षणादेव हेतोरसिद्धेः । स्याद्वा गुणत्वं, तथाऽपि कथं दिगादि व्यतिरिक्ताश्रयकल्पनम्, सिद्धद्रव्यस्य गुणान्तराश्रयप्रकल्पनायाः असिद्धद्रव्यस्य कल्पनायाः अपि लघुत्वात् । एवं युगपदागतौ यज्ञदत्तौ, विलंबेनागतः देवदत्तः इत्यादि प्रत्यक्षप्रत्ययानां अनन्यथा सिद्धानां अबाधितानां, कालप्रत्यक्षसाधकत्वेन कालस्यापि प्रत्यक्षत्वात् । एवं दिशोऽपि पूर्वापरादिप्रत्ययानां चक्षुर्मात्राधीनत्वात् दिग्विषयत्वाच्च प्रत्यक्षत्वम् ।

।। आत्मनिरूपणम् ।।

आत्मा चैतन्याश्रयः मानसप्रत्यक्षगम्यश्च । स च देहेन्द्रियादिभ्यः भिन्नः नानाभूतः नित्यः भोगापवर्गभाक् विभुश्चेति वार्तिकशास्त्रदीपिकादिग्रन्थेभ्यः ज्ञायते । 'अहं जानामि, कृशोहं स्थूलोहं' इत्यादिप्रतीतेः अहं बुद्धिगोचरः काश्यार्द्यधिकरणं शरीरमेव आत्मा इति चार्वाकादयः प्रतिपद्यन्ते।

नैतद्युक्तम्—ज्ञातृत्वस्य 'अहं जानामी' इत्यादौ आत्मनि अहं शब्दवाच्ये स्फुटं प्रतीतेः, तस्य च जडे शरीरे असंभवात् शरीरभिन्न एव आत्मा भवति । अत्यन्तसंसृष्टयोः एकत्वभ्रान्त्या सामानाधिकरण्यप्रतीतिः 'स्थूलोऽहं' कृशोहं इत्यादौ । यथा 'उष्णं जलं'

भास्वरः अयः पिण्डः' इति । 'ममेदं शरीरं' इति भेदबुद्धेरपि शरीरभिन्न एव आत्मा । 'उक्तं च गीतयां भगवता—'एतद्यो वेत्तितं प्राहुः क्षेत्रज्ञ इति तद्विदः' (गी-१३-२) इति । 'अविनाशी वा अरे अयमात्मा' इत्यादि श्रुतयः विनाशिनो देहात् अविनाशिनं आत्मानं भिन्नमवगमयन्ति । स्वर्गकामादिचोदना अपि शरीरभिन्नं परलोकफलोपभोगयोग्यं कर्तारं कंचिदन्तरेणानुपपद्यमानाः तमाक्षिपन्तीति सिद्धः शरीरात्मनोः भेदः ।

एवं इन्द्रियेभ्योऽपि भिन्नः आत्मा—इन्द्रियाभावेऽपि ज्ञातुः 'योऽहमद्राक्षं सोऽहं स्पृशामीति प्रत्यभिज्ञानात् । स चायं प्रति शरीरं भिन्नः, अन्यथा देवदत्तदृष्टमर्थं यज्ञदत्तोपि जानीयात् । स चादृष्टचरः । एवं सुखदुःख व्यवस्थापि आत्मभेदसद्भावे प्रमाणम् । उपनिषत्सु स्मृतिषु च आत्मैकत्ववादानां कागतिरितिचेत्, अवैलक्षण्यपरत्वात् न दोष इति ब्रूमः । 'निरञ्जनः परमं साम्यमुपैति' 'मम साधर्म्यमागताः, 'उत्तमः पुरुषस्त्वन्यः'। इत्यादि श्रुतिभिः स्मृतिभिः प्रत्यक्षेण च भेदस्य स्फुटमवभासात् । वार्तिककारा अपि अपूर्वाधिकरणे तन्त्रवार्तिके 'चैतन्यात्मकत्वाद्यविभागाच्चोपनिषत्सु ऐकात्म्य व्यवहारः' इति वदन्ति । शांकरसंमतमैकात्म्यवादं अविद्यावादं च संबन्धाक्षेपपरिहारे (श्लो-वा-१-१-५-८४-८६ श्लों) दूषयन्ति । तत्र व्याख्याने पार्थसारथिः 'निरस्तश्चायं पक्षो निरालंबनवादेन इति वदन् ऐकात्म्यवादमनभिप्रेतं सूचयति ।

स चायमात्मा द्विविधः परमात्मा जीवात्माचेति । परमस्वरूपं च ग्रहैकत्वाधिकरणे तन्त्रवार्तिकेस्पष्ठम् । यथा—

तथा व्योमशरीरोपि परमात्मा श्रुतौ मतः ।
इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः ॥

शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते ।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥ इति

अत्र न्यायसुधा—कस्याः श्रुतेः व्योमशरीरता श्रुतेत्यपेक्षायां 'खं ब्रह्मे' तिश्रुत्या व्योमशरीरतया उदितः इत्युक्तम्। यः आकाशे-तिष्ठन्नाकाशमन्तरा यमयति यमाकाशो न वेद यस्याकाशः शरीरं एष त आत्मा अन्तर्याम्यमृतः' इति श्रुत्यन्तरसूचनार्थः चकारः । 'शब्दब्रह्मे' त्यत्र शब्दब्रह्मवादस्य च चेतनाचेतनयोः शब्द (ब्रह्मशब्दयोः) तादात्म्यानुपपत्तेः, शब्दो ब्रह्माधिष्ठानमित्येवं व्याख्येयत्वात्, शब्दात्मकानामपि वेदानां देहत्वं ब्रह्माख्यस्य च परमात्मनोऽपि देहाधिष्ठातृतां सूचयितुमाह 'शब्दे' ति । यद्वेदाख्यं शास्त्रं शब्द-ब्रह्मेत्युच्यते, तत्परमात्मना अधिष्ठितमिति योज्यम्' इति (न्यायसुधा)

खण्डदेवोऽपि भाट्टरहस्ये 'उपनिषदादिप्रमाणगम्यमीश्वर-मप्यङ्गीकृत्य तदिच्छैव तत्तदाकारिका वेदे लिङाद्यर्थः तात्पर्यरूपा च' इत्याह ।

एतेन वृत्तिकारसंमताः, जीवपरमात्मभेदवादः, शरीरात्मभावेन सामानाधिकरण्यनिर्वाहः, जीवानां परस्परभेदः, इत्येवमादयः अर्थाः वार्तिककारसंमताश्चेति वृत्तिकाराणां सिद्धान्त एव वार्तिककारसिद्धान्तः इति सिद्धम् ।

आत्माचायं (ज्ञानस्वरूपः) ज्ञाता सुखदुःखाद्याश्रयश्च । सुखदुःखाद्यनुभव एव संसारः । सुखदुःख विहीनतया अत एव च स्वस्थः मुक्त इत्युच्यते । तथा च येह्यागमापायिनो धर्माः बुद्धिसुख-दुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः तानपहाय यदस्य नैजं स्वरूपं ज्ञानशक्तिसत्ताद्रव्यत्वादि तद्विशिष्टतया च स्थितिरेव मुक्तिरित्युच्यते

वस्तुतस्तु न आत्यन्तिकसुखनाशः मुक्तिरिति व्यपदेष्टुं शक्यते। मोक्षस्य अपुरुषार्थत्वप्रसङ्गात्। न च दुःखाभावमात्रात् सुषुप्तेरिव मुक्तेरपि समीहितत्वसिद्धिरितिवाच्यम्। दुःखाभावसमीहितत्वस्याल्पविषयत्वात्। अन्यथा विस्मृत्य सुप्तोस्थितस्य दुःखाभावे प्रतिसंधीयमानेऽपि कामिन्यालिङ्गनादिसुखलवलोपनिमित्तदुःखानुषङ्गाभावप्रसङ्गात्: विद्यते च 'वृथैव, मयैवंसुप्तं अस्या आलिङ्गनं विनैवेति दुःखसङ्गः। अतः न दुःखाभावमात्रं मोक्षः। नापि प्रपञ्चलयोमोक्षः। प्रपञ्चलयस्याभावात्। न हि प्रपञ्चस्य मायामयत्वं ज्ञानबाध्यत्वं च। प्रपञ्चस्य सत्यत्वेन ज्ञानबाध्यत्वा संभवात्। एतद्विस्तरस्तु अस्मदीयतत्त्वसुधायाम्॥

अतः दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः।
मोक्षस्य लक्षणम् आनन्दस्यानुभूतिस्तु मुक्तिरुक्ता कुमारिलैः॥

संसारदशायां विद्यमानोऽपि नैजानन्दः देहादि ध्वंसानुगृहीतमनोरूपसामग्र्यभावात् तदानीमननुभूतः देहादिध्वंसानन्तरं आविर्भूत इति स्वाभाविकानन्दानुभूतिर्मुक्तिरिति तु युक्तम्। यदिह वक्तव्यं आत्मविषये तद्विस्तरेण श्लोकवार्तिकभूषणे (आत्मवादे) अस्माभिर्निरूपितं तत्रैवोपलब्धव्यम्॥

॥ मनोनिरूपणम् ॥

'सुखाद्यपरोक्षसाधनं इन्द्रियं मनः' इति मनसः लक्षणम्। आत्मादावतिव्याप्तिवारणाय इन्द्रियमिति। चक्षुर्मुखेष्वतिव्याप्तिवारणाय सुखादीति। तच्चेदं मनः विभु। मनः विभु स्पर्शानर्हद्रव्यत्वात् कालादिवत्। मनः विभु ज्ञानासमवायिकारणसंयोगाधारत्वात् आत्मवत् इत्यनेन वा विभुत्वसिद्धेः। इति दशमद्रव्यं मनः॥

॥ अथ शब्द निरूपणम् ॥

श्रोत्रेन्द्रियमात्रग्राह्यम् द्रव्यं शब्दः । स च विभुः । श्रोत्र ग्राह्यत्वे च शब्दस्य न विवादः । शब्दत्वं च जातिः । केचित्तु शब्दस्य गुणत्वमेव युक्तं न तु द्रव्यत्वमित्यभिप्रयन्ति । तन्न । लोके गुणः सर्वत्र किंचिदाश्रिततयैव प्रतीयते । न स्वतन्त्रतया शब्दस्तु न तथा । निराश्रयतयैव प्रतीतेः । अतः शब्दस्य गुणत्व कथनं प्रत्यक्षविरुद्धम् । "शब्दः द्रव्यं सत्त्वेसति अनाश्रयत्वात् कालवत्" इत्यनुमानमपि शब्दस्य द्रव्यत्वे प्रमाणम् । विमतं द्रव्यं शब्दाश्रयो न भवति द्रव्यत्वात् घटवत् इति प्रयोगेण निराश्रयत्वसिद्धिश्च । तस्मात् द्रव्यत्वं शब्दस्येति सिद्धम् ।

शब्दश्चायं विभुः अनवयवद्रव्यत्वात् आत्मवत्, इत्यनुमानेन विभुत्वं च तस्य । न च परमाणुष्वनैकान्तिको हेतुरिति वाच्यम् । अनारंभकत्वे सतीति विशेषणे अदोषात् । विभुत्वनित्यत्वाभ्यामेव गकारादीनां न भेदः अपि त्वेकत्वमेव । विभुत्वाङ्गीकारात् अनेक देशोपलब्धेः, ताल्वादि व्यापाराभिव्यक्तत्वाङ्गीकारात् सर्वदोपलब्धि प्रसङ्गपरिहारस्य चोपपत्तिरिति न गौरवापादकवर्णानेकत्वस्वीकारो युक्तमिव । एवं च स एवायं गकारः इति प्रत्यभिज्ञाया अपि अञ्जसैवोपपत्तिर्भवति । एतेन वर्णनित्यत्व तदनेकत्ववादिनः निरस्ताः वेदितव्याः । प्रत्यभिज्ञायाः गौणत्वकल्पनापत्तेः । येषांश्च प्रत्यभिज्ञायाः बलवत्प्रमाणविरोधेन व्यक्तिगतमेकत्वं गृहीतुमशक्यं तस्या एव जात्यात्मना एकगोचरत्वकल्पनं न तु बाधरहितस्थलेऽपि । अन्यथा 'सोयं देवदत्तः' इत्यादेरपि तथात्वप्रसङ्गात् । न च, उत्पन्नः गकारः, विनष्टः गकारः इति प्रतीतिरेव बाधिकेति वाच्यम् ।

अभिव्यञ्जकताल्वादिव्यापारानन्तरभाविप्रतीतिमात्रेण तस्यान्यथा सिद्धत्वात् । भवति चैवं नित्यानां विभूनां च आकाशादीनां कूपखननव्यापारानन्तरोपलब्धिकत्वेन तज्जन्यत्वाभावेऽपि तदभिव्यक्तिरिति, तद्वदत्रापि स्यात् । न च ताल्वादिव्यापाराणामभिव्यञ्जकत्वे शब्दानां विभुत्वेन अभिव्यक्तस्य वर्णस्य सर्वोपलभ्यत्वापत्तिरिति वाच्यम् । ताल्वादिव्यापारोत्पन्नध्वनिश्रोत्रसंयोगस्यैव व्यञ्जकत्वात् श्रोत्रस्य च प्रतिपुरुषं भिन्नत्वेनोक्तापत्तेरप्रसरात् ।

न च एकस्यैव गकारस्य, कथं तीव्रमन्दतीव्रतरत्वादिविरुद्धधर्माक्रान्तता भवेत् अतो भेद एव युक्त इति वाच्यम् । एकस्यैव मुखस्य मणिकृपाणादर्शाद्यभिव्यञ्जकभेदेन यथा विरुद्धधर्मवत्वेनोपलब्धिः न मुखभेदश्च तथा अत्रापि स्यात् । अतः न शब्दभेदः न तदुत्पत्तिश्च । शब्दोत्पत्तिं वदन्तः नैयायिका अपि प्रथमस्य शब्दस्य ताल्वादिव्यापारोत्पाद्यत्वं, अन्येषां च स्वपूर्वपूर्वशब्दोत्पाद्यत्वं, आद्यस्य कार्यनाश्यत्वं अन्त्यस्य कारणनाशित्वं, श्रोत्रसमवेतस्यैव ग्राह्यत्वं वीचीतरङ्गन्यायेन कदंबमुकुलन्यायेनवा शब्दारंभ इति बहुतरादृष्टजातं परिकल्पयन्तः गौरवपराहताः इति शब्दनित्यत्वपक्ष एव मीमांसकसंमतः युक्तः इति सिद्धाः शब्दस्य द्रव्यत्व विभुत्व नित्यत्वादयः ।

शब्दश्चायं द्विविधः वर्णात्मकः (वाचकः) ध्वन्यात्मकश्चेति (अवाचकश्चेति) । तत्र अवाचकः भेरीप्रहरजन्यः । वर्णात्मकाः शब्दाः संभूय एकार्थवाचकाः पदत्वेन अभिधीयन्ते । अर्थबोधकवर्णसमुदायः पदमिति यावत् ।

वैयाकरणास्तु, 'एकं पदं' इति एकत्वबुद्धेः पदे जायमानत्वात् वर्णविषयत्वे च तस्याः, तेषामनेकत्वेन तदनुपपत्तेः वर्णव्यङ्ग्यं

स्फोटात्मकं किञ्चित्तत्वं परिकल्पयन्ति । तत्तु न युक्तम् । अनेकेषां वर्णानां एकपदार्थप्रतिपत्तिकारणत्वेनैव एकबुद्धिविषयत्वोपपत्तेः नातिरिक्ततत्त्वकल्पनावकाशः मनागपि । एवमेव वाक्यस्फोटस्यापि निराकरणम् । अतः पदान्येव पदार्थबोधकानि । तत्र पदानां जातावेव शक्तिः । न तु नैयायिकानामिव व्यक्तौ । अतः शब्दार्थयोरुभयोरपि नित्यत्वम् । संभन्धिनोरुभयोरपि नित्यत्वात् संबन्धस्यापि नित्यत्वमिति वेदे कथंचिदपि पुरुषापेक्षायाः अभावात् सिद्धं वेदप्रामाण्यमक्षतं शब्दप्रामाण्यं चेति ॥

॥ इति शास्त्रालोके द्रव्यनिरूपणम् ॥

॥ जातिनिरूपणम् ॥

'पदानां जातावेव शक्तिः न तु व्यक्तौ, इति यदुक्तं तत्र जातिरिति कश्चन पदार्थः नैव वक्तुं शक्यते इति बौद्धाः प्रत्यवतिष्ठन्ते । तथा हि जातिः सर्वगता व्यक्तिगता वा । नाद्यः सर्वत्रोपलब्धिप्रसङ्गात् । नापि द्वितीयः, तदानीं उत्पन्नायाः व्यक्तेः व्यक्त्यन्तरवर्तिन्या जात्यासाकं अन्वयानुपपत्तेः । ननु भवतु तर्हि व्यक्तेरुत्पत्तिसमय एव जातिरप्युत्पन्नेति इति चेन्न सिद्धान्ते जातेर्नित्यत्वेन तदनुपपत्तेः । भवतु तर्हि व्यक्त्यन्तरादागत्य संबध्यते इति, इति चेन्न अमूर्तायाः जातेः निष्क्रियत्वात् गमनागमनादेरयोगात् । नाप्येकदेशेन संबन्धः, निरंशत्वात् जातेः । किंच, किं व्यक्तिनाशे जातिरपि नश्यति, उत तत्रैवावतिष्ठते, व्यक्त्यन्तरं प्रति गच्छति वा, नाद्यः नित्यत्वात्, न द्वितीयः, तत्रानुपलंभात्, नापि तृतीयः,

क्रियारहितत्वात् , यां व्यक्तिं प्रतिगच्छति, तत्र जातिद्वयोपलब्ध्या-पत्तेः । अतः—

न याति न च तत्रासीत् अस्ति पश्चान्नचांशवत् ।
जहाति पूर्वं नाधारं अहो व्यसनसंततिः ॥ इति ।

अत्रोच्यते—योऽयं विकल्पः, सामान्यं सर्वगतं उत व्यक्तिगतं वेति—तत्र पक्षद्वयमपि स्वीकुर्मः सर्वगतत्वे व्यक्तिगतत्वस्यापि सिद्धत्वात् न पृथक् साध्यत्वम् ।

यद्येवं तर्हि सर्वत्रोपलब्धिप्रसंगः इति चेन्नैवं व्यक्तिव्यङ्ग्यत्वस्य स्वीकारादेव व्यक्तिस्थल एवोपलब्ध्युपपत्तेः । व्यक्त्यपृथक् सिद्धत्वस्य जातावङ्गीकारादेव गत्यागतिनिबन्धन दूषणानामनवकाशः । अतस्सिद्धाजातिर्निर्बाधा ।

यच्चोच्यते बौद्धैः सामान्यप्रत्ययस्थले सर्वत्रापि अगोनिवृत्ति (अपोहः) मात्रविषयत्वेनैवोपपत्तिरिति । तत्र ब्रूमः विधिमुखेन जायमानस्य ज्ञानस्य निषेधविषयकत्वाङ्गीकारे अनुभवविरोधात् । अन्यापोहस्य निषेध्यद्रव्यविशिष्टत्वात् गोत्वमेवायातम् । उक्तं च

"अगोनिवृत्तिसामान्यं वाच्यं यैः परिकल्पितम् ।
गोत्ववस्त्वेव तैरुक्तं अगोपोहगिरास्फुटम् ॥

इति ।

ननु जातेरभेदः व्यक्त्या, उत भेदः, नाद्यः व्यक्तिभिन्नजात्य-भावापत्तेः, नापि द्वितीयः गोरेव गोत्वव्यञ्जकत्वमिति नियमाना-पत्तेः । भिन्नत्वाविशेषेण अश्वादेरपि गोत्वव्यञ्जकत्वे बाधाभावात्, इति चेन्न जातिव्यक्त्योः भेदाभेदाङ्गीकारादेवोक्तदोषाप्रसक्तेः । शीतोष्णयोरिव विरुद्धयोः भेदाभेदयोः कथमभ्युपगमः ? इति चेत्,

दर्शनबलादेव तथाभ्युपगमोपपत्तेः । यदि जातिजातिमतोरत्यन्तभेद एव स्यात् तर्हि 'इदं गोत्वे' इति हि प्रतीतिः स्यात्, अत्यन्तभिन्नयोः घटपटयोः 'घटपटौ' इत्येव प्रयोगात् । न च तथा प्रतीतिः । अतो न भेदः नाप्यभेदः, हस्तः करः इत्यादिवत् पर्यायत्वस्य इदं गोपदयोः प्रसंगात् । अतः इदं गोपदयोरपर्यायत्वेऽपि 'अयं गौः' इति सामानाधिकरण्यदर्शनात् भेदाभेदसमुच्चयमेव जातिजातिमतोः मीमांसकाः अनुभवबलात् स्वीकुर्वन्तीति नानुपपत्तिः ॥

॥ अथ गुणनिरूपणम् ॥

कर्माभिन्नत्वेसति उपादानत्वरहितत्वेसति गुणत्वविशिष्टत्वं (जातिमत्वं) गुणस्य लक्षणम् । स च चतुर्विंशतिविधः । यथा— रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व-द्रवत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारध्वनिप्राकट्यशक्तिभेदात् इति । तार्किकमते शब्दधर्माधर्मादीनां गुणत्वेन स्वीकरणम् । सिद्धान्ते तु शब्दस्य द्रव्यत्वात् धर्माधर्मयोश्च विहितनिषिद्ध क्रियारूपत्वात् न गुणत्वमिति भिदा । तत्र रूपादीनां तार्किकैः यानि लक्षणान्यभिहितानि, सति संभवे तान्येव सिद्धान्ते प्यभिमतानि इति न पृथक् निरूप्यन्ते। यत्र विशेषः स परं वक्ष्यते ॥

१) नेत्रमात्रग्राह्यो गुणो रूपमिति रूपस्य लक्षणम् । तच्च पृथिवी, जलं, तेजः तमः, इत्येतच्चतुष्टयवर्ति । शुक्लकृष्णा रक्तपीत श्यामहरितभेदात् षड्विधं च ।

२) रसनेन्द्रियमात्रग्राह्यः गुणः रसः । पृथिवीजलद्वयवर्ती । स च मधुराम्लकटुकषायतिक्तलवणभेदात् षड्विधः ।

३) घ्राणमात्रग्राह्यो गुणो गन्धः । भूमात्रवर्ती च । सुगन्धः दुर्गन्धः साधारणगन्धश्चेति स त्रिविधः ।

४) त्वगिन्द्रियमात्रग्राह्यः गुणः स्पर्शः । स च शीतोष्णाऽनुष्णाशीतभेदेन त्रिविधः । पृथिवीजलतेजोवायुवृत्तिः ।

५) एकत्वादिव्यवहारहेतुर्गुणः संख्या । इयं च न पूर्व निरूपितवत् विशेषगुणः, अपि तु सर्वद्रव्यवर्तित्वात् सामान्यगुण इत्युच्यते । सा परार्धपर्यन्ता ।

६) मानव्यवहारकारणं परिमाणमपि सर्वद्रव्यगतत्वात् सामान्यगुणः । अणुमहद्दीर्घह्रस्वादिभेदभिन्नं च । परमाणुगतं अणुत्वम् । व्योमादिगतं परममहत्परिमाणम् ।

७) पृथक्त्वव्यवहारकारणं पृथक्त्वं सामान्यगुणः ।

८) सर्वद्रव्यवर्ती संयुक्तव्यवहारासाधारणहेतुः गुणः संयोगः। स द्विविधः नित्योऽनित्यश्चेति । विभूनां संयोगो नित्यः । घटपटादिसंयोगस्त्वनित्यः । स त्रिविधः, अन्यतरकर्मजः, उभयकर्मजः, संयोगजसंयोगश्चेति । तत्र आद्यः पुरुषपर्वतसंयोगः । मल्लयोर्युध्यतोस्संयोगः द्वितीयः । हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः तृतीयः ।

९) विभुभिन्नद्रव्यसामान्यवर्ती विभक्तव्यवहारहेतुर्गुणः विभागः। संयोगवदत्रापि त्रैविध्यं द्रष्टव्यम् ।

१०) परापरव्यवहारासाधारणहेतुः परत्वापरत्वे । ते च कालदिशोः परं वर्तेते । ज्येष्ठकनिष्ठयोः कालकृते, दूरस्थसमीपस्थयोश्च दिक्कृते ते इति विभागः ।

१२) आद्यपतनासमवायिकारणं पृथिवीजलमात्रवर्ती गुणः गुरुत्वम् ।

१३) पृथिवीप्रभृतिद्रव्यत्रयवर्ती द्रवत्वगुणः स्वाभाविक नैमित्तिकभेदात् द्विविधः। जलस्य स्वाभाविकद्रवत्वविशिष्टत्वं, पृथिवीतेजसोस्तु उपाधिवशात् तत्।

१४) जलासाधारणः स्निग्धत्वादिबुद्धिविषयः विशेषगुणः स्नेहः।

१५-२०) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः षट् आत्ममात्रवर्तिनः गुणाः। एतेषु षट्सु बुद्धिभिन्नानां पञ्चानामपि मानसप्रत्यक्षविषयत्वम्। बुद्धिः परं अर्थप्रकाशपर्यायप्राकट्यान्यथानुपपत्ति (अर्थापत्ति) गम्या॥ प्राकट्यलिङ्गेन अनुमेया वा।

वेदान्तिनस्तु बुद्धेः स्वयंप्रकाशत्वं स्वीकृत्य एवं प्रयुञ्जते अनुमानं—ज्ञानं स्वगतव्यवहारात्मके कार्ये स्वसजातीयानपेक्षं, तादृश-परगतकार्यकारित्वात्, दीपवत्, इति। इदं त्वत्रोच्यते-अर्थान्तरानुमापके लिङ्गान्तरगम्ये लिङ्गे व्यभिचारदर्शनात् न युक्तमिति। अतः नानुमानं स्वप्रकाशत्वसाधकं ज्ञाने। किं तर्हि? ज्ञेयत्वमेव ज्ञानस्येष्टं। सत्यम्। तर्हि घटादिवज्जडत्वप्रसक्तिः कथं वार्यतं? स्वप्रकाशत्ववादिनां मतेऽप्ययं तुल्यो दोषः, परगतज्ञाने चेष्टादिभिर्लिङ्गैरनुमेये ज्ञेयत्वस्यैव दृढमवगतेः। अतः न धीकर्मत्वमात्राज्जडत्वं, किं तु व्यवहारानुगुणत्वं यदधीनं तदजडं, यस्य च व्यवहारानुगुण्यहेतुत्वं न भवति तज्जडमिति जडाजडयोर्विभागाददोषः। प्रत्यनुमानं च—ज्ञानं न स्वप्रकाशं वस्तुत्वात्, घटादिवत् इति। इदं च मीमांसकमतमवलंब्य निरूपितम्।

वस्तुतस्तु श्रुत्याद्यनुसारात् अनुभवानुरोधाच्च यथा ज्ञानस्य स्वप्रकाशत्वमेव युक्तं, तथा अस्मदीये 'तत्त्वमुक्ताकलापप्रकाशे' बुद्धिसरे द्रष्टव्यम्। एवं ज्ञाननित्यत्वमपि 'तत्त्वसुधा' यामस्मदीयायाम्।

तार्किकास्तु ज्ञानं मानसप्रत्यक्षवेद्यं क्षणिकत्वे सति आत्मविशेष-गुणत्वात् " इति वदन्ति, तत्तु सुषुप्तिकालिकप्राणनक्रियानुमेय-प्रयत्नादौ व्यभिचारादुपेक्षितम् । अतः ज्ञानं पूर्वोक्तरीत्या प्राकट्या-नुमेयमेव । न च ज्ञातस्यैव लिङ्गस्य (प्राकट्यस्य) ज्ञानगमकत्व-मेष्टव्यं, ततश्च प्राकट्यविषयक ज्ञानान्तरमेष्टव्यं, तत्रापि ज्ञानान्तरमि-त्यनवस्था दुष्परिहरेति वाच्यम् । मूलक्षयकरत्वाभावादस्याः अनवस्थाया अदोषात् । कथं ? ज्ञानस्य जातत्वेऽपि ज्ञातव्यत्व-नियमाभावात् । अविज्ञायमानस्यापि विषयप्रकाशकत्वं चक्षुरादौ दृष्टमिति न दोषः ।

२०) सुखं = सर्वेषामनुकूलतया वेदनीयम् । तच्च त्रिविधं ऐहिकं, आमुष्मिकं (स्वर्गसुखं) मोक्षसुखं चेति । ऐहिकसुखं ऐन्द्रियिकं भोजनवनितादिजन्यं दुःखमिश्रंच । स्वर्गसुखं पुनः देहान्तरदेशान्तरभोग्यं दुःखरहितम् । उभयस्याप्यस्य धर्म एव कारणम् । मोक्षसुखं तु आत्यन्तिकदुःखनिवृत्तिरूपं ज्ञानप्राप्यम् ।

दुःखं तु प्रतिकूलतया वेदनीयम् । अधर्महेतुकं तत् । तदप्यामुष्मिकैहिकभेदेन द्विविधम् । आमुष्मिकं रौरवमहारौरवादिरूपं अनेकधा प्रविभक्तम् । ऐहिकं तु रोगादिना जायमानम् ।

इच्छा ' ममेदं भवतु ' इत्थंरूपा ।

शत्रुविषयः प्रतिकूलभावविशेषः द्वेषः ।

प्रयत्नः—क्रियाऽव्यवहितपूर्ववर्ती आत्मविशेषगुणः ।

संस्कारः लौकिकालौकिकभेदेन द्विविधः । आद्यः, वेगः, भावना, स्थितस्थापकः इति त्रिविधः । आदिमः वेगः क्रियाहेतु पृथिव्यादिपञ्चद्रव्यस्य विशेषगुणः । द्वितीयस्तु केवलमात्मनि वर्तमानः अनुभवकारणकः । तृतीयस्तु स्थितस्थापकः, स्पर्शवद्द्रव्य-वर्ती विकृतद्रव्यस्य पूर्वावस्थापादकः संस्कारः ।

वैदिकसंस्कारः प्रोक्षणतक्षणादिरूपः तत्तद्रव्योद्देशेन वेदवाक्यै विहितः अदृष्टोत्पादकः। स च द्वितीयाश्रुत्या अवसेयः, यथा—व्रीहीन् प्रोक्षति, यूपं छिनत्ति इत्यादौ।

२२) ध्वनिः—शब्दाभिव्यञ्जकः वायुगुणः। अयं च पूर्वमेव शब्दद्रव्यसाधनावसरे निरूपित इति नात्र विस्तरः।

२३) प्राकट्यं सर्वव्यवहारहेतुः सर्वद्रव्यवर्ती अतिशयः सामान्यगुणः। संयुक्ततादात्म्यसंबन्धेन तु तस्य प्रत्यक्षगम्यत्वम्। अस्यैव प्राकट्यस्य ज्ञातता इत्यपि नामान्तरम्। 'घटः प्रकाशते' 'प्रकटो घटः' इत्यादि व्यवहारः अभ्रान्तानां स्वोपपत्त्यर्थं प्राकट्य युक्तमर्थमवकल्पयति। अतश्च विषयगतः प्रकाश एव प्राकट्याख्यः ज्ञानानुमापकः इष्यते। न च ज्ञानेनैव 'घटः प्रकाशते' इत्यादि प्रतीतीनां निर्वहणात् न ज्ञानातिरिक्तप्राकट्यस्वीकरणं युक्तमिति वाच्यम्। आत्मसमवेतज्ञानस्य घटसमवेतत्वव्यवहारायोगात्। प्राकट्यं तु घटादिविषयसमवेतत्वेन हि व्यवह्रियते। अतः न ज्ञानमेव प्राकट्यम्। ननु यदि प्राकट्याश्रयो विषयः तर्हि कथं अतीतानागतयोः विषयत्वमिति चेत्—भूतभविष्यतोरपि प्राकट्या श्रयणात्। कथमन्तरेण गुणाश्रयं गुणसद्भाव इति चेत्। संख्यास्विवाविरोधात्। पञ्च प्रयाजाः इष्टाः, षडपूपाः भक्षिताः, दश घटा भविष्यन्ति' इत्यादि व्यवहारेषु भूतभाविविषयाणामपि संख्याश्रयत्वदर्शनात्। अतः सिद्धं प्राकट्यम्।

पदार्थस्य दाहादि स्वभावः शक्तिः

२४) शक्तिः = अग्न्यादेः प्रतिबन्धकमण्यादेरसमवधाने दाहकत्वदर्शनात् समवधाने च तददर्शनात् अर्थापत्त्या वह्न्यादिगता दाहानुकूला शक्तिः कल्प्यते। सा द्विविधा लौकिकी वैदिकी चेति। आद्या ,अग्नौ द्वितीया यागादौ स्वर्गसाधनत्वशक्तिः। शक्तेश्च

दोषध पराशक्तत्वात्
पराद्धं - उद्धृत

द्रव्यगुणकर्मगतत्त्वम् । अग्नौ दाहशक्तेः, आरुण्यश्वेतादौ अदृष्टशक्तेः दर्शपूर्णमासादौ स्वर्गापूर्वजनकत्वशक्तेर्दृष्टत्वात् ।

तार्किकाश्च-शक्तिरेवभिन्नानास्तीति वदन्तः पदार्थस्वभावभेदेन शक्तिं समर्थयन्ति । नैतद्युक्तम् । स्वभावस्य (नित्यतया) यावद्द्रव्य भापितया प्रतिबन्धकसमवधाने अपि कार्यजनकत्वापत्तेः । न च प्रतिबन्धकाभाव एव दाहादिकार्यकारणं, प्रतिबन्धकसमवधाने च तदभावान्न कार्योत्पत्तिरिति वाच्यम् । अभावस्य क्वापि कारकत्वादर्शनात् । अतः शक्तिरतिरिक्तः पदार्थः गुणान्तर्भूताचेति सुस्थम् ।

॥ अथ कर्मनिरूपणम् ॥

अविभुद्रव्यवर्तित्वे सति संयोगविभागकारणं चलनादिकं कर्म । तच्च प्रत्यक्षम् । तच्च उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चविधम् । प्राभाकाराः पुनः कर्मणः प्रत्यक्षत्वं न स्वीकुर्वन्ति । ते च मन्यन्ते सर्वद्रव्यगतः सुसूक्ष्मः व्यापारः (कर्म) संयोगात् विभागाद्वा अनुमीयत इति । शब्दनित्यत्वाधिकरणभाष्ये च 'बुद्धिकर्मणी अपिते प्रत्यभिज्ञायेते' ते अपि नित्ये प्राप्नुतः' इत्याक्षिप्य 'न हि ते प्रत्यक्षे' इति समाधानपरभाष्ये समाहितम् । अतः 'न हि ते प्रत्यक्षे' इति भाष्ये कर्माप्रत्यक्षत्वस्य स्फुटमभिधानात् कर्म अतीन्द्रियमिति तेषामाशयः ॥

इदमुच्यते—कर्मणोपि 'गौर्गच्छति श्येनश्चलतीति' इत्यादौ घटादिवत् प्रत्यक्षतया उपलंभात् तदप्रत्यक्षत्ववर्णनं लोकविरुद्धमिति । न च 'चलत्यादि' प्रत्ययानां संयोगविभागमात्रविषयत्वात् न कर्मविषयत्वमिति न प्रत्यक्षत्वविरोधः इति वाच्यम् । संयोगविभागयोरेव नेत्रगोचरत्वं ताभ्यामेव च कर्मानुमानमिति पक्षे,

स्थाणोः श्येनसंयोगे, विभागेवा, स्थाणुश्चलतिति प्रतीत्यापत्तिः। न हि नदीतीरवर्तिपाषाणादीनां चलतिप्रत्ययविषयत्वं दृष्टचरम्। प्राभाकरमते च तदापत्तिः। संयोगविभागाश्रयत्वात् पाषाणादीनाम्। एवं भूकम्पे भूमेरेव कम्पितत्वं न तद्वर्तिनां कर्माश्रयत्वम्। अतः कर्मप्रत्यक्षमेवेत्यप्रकम्प्यम्। संयोगविभागातिरेकश्च। "देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्य आदित्यगतिस्मरणम्" इति भाष्यकारोऽपि कर्मणः प्रत्यक्षत्वादेव तत् दृष्टान्तीकरोति। उभयत्रापि कर्मणो अनुमेयत्वे दृष्टान्तदार्ष्टान्तिकभावानुपपत्तेः ॥

यथा चैवं सति 'न हि ते प्रत्यक्षे' इति शब्दनित्यत्वाधिकरणस्थ-भाष्यस्योपपत्तिः तथा तदधिकरणभाष्यश्लोकवार्तिके तत्रस्थे अस्मदीय श्लोकवार्तिकभूषणे च स्पष्टम्।

इति शास्त्रालोके कर्मनिरूपणम् ॥

॥ अभावनिरूपणम् ॥

अभावो हि नञा तत्र तत्र उल्लिख्यमानः भावविलक्षणः पञ्चमः पदार्थः चकास्ति। तस्य च ग्राहकं प्रमाणं अनुपलब्धिरिति पूर्वमेव हि निरूपितम्। स च अभावः संसर्गाभावान्योन्याभावभेदात् आदौ द्विविधः। संसर्गाभावोऽपि प्रागभावप्रध्वंसाभावअत्यन्ताभाव भेदात् त्रिविधः।

'अजातो घटसंबन्धः प्रागभावस्तदोच्यते।
उत्पद्य स विनष्टश्चेत् प्रध्वंसाभाव इष्यते ॥
शशस्यत्वविषाणित्वं सार्वकालिकमुच्यते ॥

अत्र निरूपिते (भविष्यति घटे) नास्तीति व्यवहारे, घटे नष्टे, घटो नास्तीति, व्यवहारे शशे विषाणं ने' तिव्यवहारे च घट

विषाणसंसर्गस्यैव तत्तद्देशतत्तत्कालावच्छेदेन निषेधात् प्राग भावप्रध्वंसाभावात्यन्ताभावानां संसर्गाभावत्वेन कीर्तनं भवति। अन्यस्मिन् अन्यतादात्म्यनिषेधे तु अन्योन्याभावः 'यथा घटः पटो ने' ति।

प्राभाकरास्तु अभावमतिरिक्तं अधिकरणान्नेच्छन्ति। तन्मते हि घटाभावः भूतलादिकमेव। भावान्तरमेव अभावः इति च तेषामाशयः।

अत्र ब्रूमः—'अघटं भूतलं, भूतलेपटोनास्ति' इति च व्यवहारः विशिष्टव्यवहार इत्यवश्यमङ्गीकार्यम्। तत्र विशेषणीभूतस्य तत्त्वान्तरस्याभावे विशिष्टव्यवहारस्योपपत्तिः कथं? नचायं व्यवहारः केवलं भूतलविषयक एवेति वाच्यम्। घटानयनान्तरमपि भूतलस्य सद्भावात् 'अघटं भूतलं' इति व्यवहारापत्तेः। अतः अतिरिक्तः अभाव इति अवर्जनीयः पञ्चमः पदार्थः ति च सिद्धम्।

ननु "पञ्चैवपदार्थाः" इति उपसंहारः न घटते। अन्येषामपि पदार्थानां सद्भावात्। तथा हि प्राभाकराः हि 'द्रव्यं गुणः कर्म च जातिशक्ती सादृश्यसंख्ये समवाय एते। अष्टौपदार्था इह तान् विभज्य संक्षिप्य वक्ष्यामि गुरोर्मतेन'। इति प्रतिज्ञाय अष्टौपदार्थान् निरूपयन्ति।

तार्किकाश्च "द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकान् षट् भावपदार्थान्" अभावं च सप्तमं पदार्थं वदन्ति। स्थितेचैवं कथं पञ्चैव पदार्थाः इति चेत्।

अत्र ब्रूमः—प्राभाकरसंमताष्टपदार्थेषु शक्तेः संख्यायाश्च गुणे एव अन्तर्भाव इति गुणनिरूपणसमय एव व्यक्तमुपपादितम्।

सादृश्यं तु दृष्टान्तगतानां अवयवसामान्यानां गुणसामान्यानां च दार्ष्टान्तिके विद्यमानत्वादेव गवयसादृश्यप्रतिपत्तेः, न अतिरिक्तः पदार्थः। न च गोरवयवसामान्यवत्त्वादेव सादृश्यप्रतीत्युपपत्तिरित्युक्तौ 'स एवायं' इति हि प्रतीतिरापद्येत, न तु 'सदृश' इति। विद्यते तु सादृश्यप्रतिपत्तिः। अतः सादृश्यमतिरिक्तः इति वाच्यम्। गवयगतगुणावयवसामान्यानां गोगतत्वेन निरूप्यमाणत्वं यदा, तदा तद्वदिति सादृश्यबुद्धेरुद्भवः। यदा च स्वरूपेणैव निरूप्यमाणत्वं, तदानीं तु तदिति बुद्धेरुदयः, विद्यते हि देवदत्तः यज्ञदत्तजत्वेन निरूप्यमाणः यज्ञदत्तपुत्र इति बुद्धिविषयः, स्वरूपेणैव निरूप्यमाणः देवदत्त इति बुद्धिविषयः इति प्रतीतिः। अतः द्रव्यजातिगुणेष्वेव सादृश्यस्यान्तर्भाव इति न सादृश्यस्यातिरिक्तपदार्थत्वम्।

नापि समवायः अतिरिक्तः पदार्थः, विकल्पासहत्वात्। तथा हि—समवायः समवायिभ्यः भिन्नः, उताभिन्नः, नान्त्यः, तथा सति समवाय्यतिरिक्तसमवायस्य असिद्धिरित्यापत्तेः। न प्रथमः, तथा सति समवायिनः समवायः अत्यन्तं भिन्नः केन चित् संबन्धान्तरेण संबद्धो, न वा। नाद्यः, नियामकसंबन्धस्यापि संबन्धान्तरापेक्षणे अनवस्थापत्तेः। न द्वितीयः, 'घटजातिसमवायाः' इति व्यवहारस्यैव तदा आपत्तेः। अतः 'समवायाभ्युपगमाच्च साम्यादनवस्थितेः' इति बादरायणोक्तदिशा समवायस्य निरूपयितुमशक्यतया जातिव्यक्त्योः गुणगुणिनोः क्रियाक्रियावतोश्च तादात्म्यमेव संबन्धः इत्येव युक्तमिति नातिरिक्तपदार्थत्वं समवायस्य। इदं च दूषणं समवायाभ्युपगन्तृतार्किकमतेऽप्यविशिष्टम्।

नापि तार्किकसंमतविशेषाभ्युपगमे किंचित् प्रमाणं वर्तते। न च 'समानजातीयाः समानगुणकार्याः परमाणवः, मुक्ताश्चात्मानः

परस्परव्यावर्तकधर्मसमवायिनः द्रव्यत्वात्, घटवत् इति, प्रयोगेण व्यावर्तकधर्मविशेषसिद्धिरिति वाच्यम्।

पृथक्त्वस्यैव तादृक्धर्मत्वोपपत्तौ विशेषासिद्धेः। तेन सिद्धसाध्यत्वं च। एतेन विशेषाभ्युपगन्तृद्वैतिनामपि मतं प्रत्युक्तम्। अतः पूर्वं निरूपितेभ्यः पञ्चभ्यः पदार्थेभ्यः नातिरिक्तः कश्चित् पदार्थः इति, सिद्धं कुमारिलसंमतपञ्चपदार्थाङ्गीकरणमेव युक्तमिति॥

इति श्री भारद्वाजकुलतिलक वरदाचार्यकृतिषु शास्त्रालोके द्वितीयः अध्यायः॥

। शास्त्रालोके तृतीयः अध्यायः ।

सर्वकर्मसमाराध्यं सर्वाभीष्टफलप्रदम्।
सर्वावासं वासुदेवं वन्दे श्रीतुरगाननम्॥

पूर्वयोरध्याययोः मीमांसकसंमतानि प्रमाणानि तदभ्युपगताश्च पदार्थाः सविमर्शं निरूपिताः। अथेदानीं व्युत्पित्सूनां अतिगंभीरे जैमिनीमहर्षिप्रणीते मीमांसाशास्त्रे प्रवेशसिद्ध्यै क्रमेण द्वादशाध्यायार्थाः संगृह्यन्ते।

'मीमांसा' शब्दः विचाररूपार्थं बोधयति। नास्मिन् शब्दे सन् प्रत्ययः इच्छायां भवति। अपि तु पूज्यविचारार्थे। कस्य विचारः इत्यपेक्षायां 'वेदस्ये' ति भगवान् जैमिनिराह "अथातो धर्मजिज्ञासा" इति आदिमसूत्रेण। अत्र चाथशब्दः आनन्तर्यमाह। तच्च सप्रतियोगिकमिति प्रतियोग्यपेक्षायां वेदाध्ययनमेव तादृशमिति निश्चीयते। तथा च वेदाध्ययनानन्तरमित्यर्थः। उपनीतो हि

शिष्यः गुरुकुलं प्रविष्टः साङ्गवेदस्य अध्ययनं कृत्वा गृहीतपदपदार्थ-सङ्गतिकः वेदस्य शब्दात्मकस्य अर्थबोधजननस्वभावतया गृहीते वेदे आपातप्रतीतार्थः निश्चयज्ञानलाभार्थं विचारात्मके शास्त्रे निश्चयात्मकं ज्ञानजननानुकूले (मीमांसायां) प्रवर्तते । निश्चितश्च वेदार्थः धर्म एवेति भगवान् सूत्रकारः प्रतिज्ञासूत्रं सूत्रयामास 'अथ, अतः, धर्म-जिज्ञासे' ति । वेदाध्ययनानन्तरं वेदस्य अर्थज्ञानजनकत्वेन दृष्ट-प्रयोजनकत्वात् 'धर्मजिज्ञासा' धर्मविचारः कर्तव्यः इत्यर्थः । वेदेन मीमांसोपकृतेन धर्मज्ञानं प्राप्नुयात्' इति सूत्र तात्पर्यार्थः ।

उक्तं चाभियुक्तैः—

धर्मे प्रमीयमाणे तु वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥ इति ।

द्वादशलक्षण्यामस्यां धर्मनिरूपणमेव मुख्योऽर्थः । अध्याया-श्चात्र द्वादश दृश्यन्ते । तेषु च क्रमेण, प्रमाण, भेद, शेष, प्रयुक्ति, क्रम, अधिकार, सामान्यातिदेश, विशेषातिदेश, ऊह-बाध-तन्त्र-प्रसङ्गभेदात् द्वादश विषयाः निरूप्यन्ते । तत्र प्रथमाध्याये 'मानाधीना मेयसिद्धिः' इति न्यायेन, धर्मात्मकप्रमेयज्ञानजनक प्रमाणानि निरूप्यन्ते चतुर्भिः पादैः ।

ननु कोऽसौ धर्मः किं तस्य लक्षणं ? इति चेत् तदपि सूत्रितं सूत्रकारैरेव 'चोदनालक्षणोऽर्थो धर्मः' इति । वेदैकज्ञाप्य श्रेयस्साधनताकः धर्मः इत्यर्थः । भोजनादावतिव्याप्तिव्यावृत्तये वेदज्ञाप्येति दलम् । हिमभेषजत्वेन वेदेनापि ज्ञाते अग्नौ तद्व्यावृत्तये 'एके' ति । स्वर्गादौ श्रेयसि अतिप्रसङ्गपरिहाराय 'साधने' ति । श्येनादिष्वनर्थेषु अतिव्याप्तिपरिहाराय धर्मलक्षणे 'अर्थः' इति शब्दोऽपि संयोज्यः इति । स च धर्मः यागादिः ।

तत्र वेदः, स्मृतिः, आचारः, इति प्रमाणानि (प्रथमपादे) निरूप्यन्ते। वेदोऽपि प्रमाणभूतः, विधि, अर्थवाद, मन्त्र, नामधेय भेदात् चतुर्धा विभक्तः। तत्र विधिर्नाम 'अर्थेऽनुपलब्धे तत्प्रमाण' मिति सूत्रकारोक्तदिशा अज्ञातार्थज्ञापकः लिङादिविधायक-प्रत्ययघटितपदयुक्तवेदवाक्यम्। यथा— "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, स्वाध्यायोऽध्येतव्यः", "समिधोयजति"। इत्येवमादि।

अर्थवादस्तु = विधेयगतप्राशस्त्यस्य वा निशेध्यगताप्राशस्त्यस्य वा बुद्धिजनकं लिङादि विधायकप्रत्ययरहितं, विधिसन्निधौ, निषेध-सन्निधौ श्रूयमाणं वेदवाक्यजातम्। अस्य च न स्वार्थे तात्पर्यं संभावितं, सिद्धार्थबोधकत्वात् बाधितार्थकत्वाद्वा। अतः एतेषां प्रयोजनवत्वसंपादनार्थं प्रवृत्तिशैघ्रयसंपादकप्राशस्त्यनिवृत्तिशैघ्रय संपादकाप्राशस्त्यान्यतरज्ञानजनकत्वं लक्षणया समाश्रीयते। यथा 'वायुर्वैक्षेपिष्ठा' इत्यादिः। सोरोदीत्, इत्येवमादिश्च।

मन्त्राः पुनः = अनुष्ठेयार्थविषयकस्मृतिजनकः वेदभागः। यथा 'इमामगृभ्णन् रशनामृतस्य' अग्निरसि नारिरसि' इत्येवमादिः। न च स्मृतिमात्र प्रयोजनकत्वे मन्त्राणां ध्यानादिनापि अनुष्ठेयस्मृति सिद्धौ मन्त्राम्नानवैयर्थ्यापत्तिरिति वाच्यम्। मन्त्रैरेव स्मृतिस्संपाद्येति नियमविधिस्वीकारेण नियमादृष्टस्य अन्यतो जनने प्रमाणाभावात् वैयर्थ्यशंकाऽनवकाशात्।

विधिस्तावत् त्रिविधः अपूर्वविधिः, नियमविधिः, परिसंख्या विधिश्चेति। अत्यन्ताप्राप्तार्थप्रापको विधिः अपूर्वविधिः यथा 'व्रीहीन् प्रोक्षति' इति। अत्र एतद्विधिप्रमेयस्य प्रोक्षणस्य प्रमाणा-न्तरेण केनाप्यज्ञातत्वात् अपूर्वविधित्वम्।

पाक्षिकाप्राप्तांशपूरको विधिः नियमविधिः—'यथा व्रीहीनव हन्ति' इति। अत्र चावहननस्य न प्रोक्षणवदत्यन्ताप्राप्तिः, किं तर्हि? न खविदलनादेः तुषविमोकसाधनस्य स्वीकारे परं, अतः तदा अप्राप्तस्य पूरणात्, तस्य चादृष्टफलकत्वात् (अत्र) नियमविधित्वम्।

द्वयोः नित्यप्राप्तौ इतरनिवृत्तितात्पर्यकं अन्यतरविधायकं वचनं परिसंख्याविधिः—यथा चयने 'इमामगृभ्णन्—इत्यश्वाभिधानीमादत्ते' इति। अत्र लिङ्गान्मन्त्रस्य अश्वगर्दभरशनयोः नित्यप्राप्तेः नेदं वचनं अश्वरशनामन्त्रसंबन्धबोधकं प्राप्तत्वात्। अपि तु गर्दभरशनायां नास्य मन्त्रस्य प्रसक्तिरिति अन्यनिवृत्त्यवगमार्थं प्रवर्तते। अतः अत्र परिसंख्या। सा च द्विविधा प्राप्तपरिसंख्या अप्राप्तपरिसंख्या चेति। प्राप्तपरिसंख्या च स्वार्थहानि, परार्थकल्पन, प्राप्तबाधरूपदोषत्रयघटिता। यथा पूर्वोक्तोदाहरणे, अश्वाभिधानीसंबन्धस्य स्वार्थस्य त्यागात्, गर्दभाभिधानीतो निवृत्तिरूपपरार्थस्वीकरणात्, उभयोः नित्यप्राप्तौ गर्दभरशनाबाधस्वीकाराच्चेति) 'उत्तरेहन् द्विरात्रस्य गृह्यते' इत्यादौ तु अप्राप्तपरिसंख्या। एतदधिकविचारस्तु अस्मदीये "विधिभास्करे"॥

नामधेयानां तु विधेयार्थपरिच्छेदकतया अर्थवत्त्वम्। यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादौ, यागसामान्यस्य अनुष्ठातुमशक्यत्वात् यागविशेष एव विधीयते इति वक्तव्यम्। तद्विशेषनिर्णयश्च नामधेयाधीन इति नाम्नां अर्थवत्ता॥

नामत्व स्वीकारश्च हेतुभिश्चतुर्भिः। मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यात्, तद्व्यपदेशाच्चेति। 'उद्भिदा यजेत पशुकामः' इत्यत्र उद्भिच्छब्दः कर्मनामधेयम्। अन्यथा उद्भिद्यते

अनेने' त्यादि व्युत्पत्तिसमाश्रयणेन खनित्रादिगुणपरत्वमित्याद्यङ्गीकरणे 'सोमेने 'तिवत् ' उद्भिद्वते ' ति मत्वर्थलक्षणापत्तेः । सोमेत्यगतिः ।

'चित्रया यजेत पशुकामः ' इत्यत्र चित्रापदं कर्मनामधेयं, वाक्यभेदभयात् । गुणविधानं चेत्, स्यात् एवं तदा प्राप्तयागानुवादेन चित्रत्वस्त्रीत्वविधिरिति । तथा चानेकविधानप्रयुक्तवाक्य भेदः । अतः चित्रापदं कर्मनामधेयमेव । प्रकृतप्राजापत्ययागस्य अबाधनेकद्रव्यवत्वेन चित्रत्वस्य, इष्टयभिप्रायेण स्त्रीत्वस्य चोपपत्तेः ।।

' अग्निहोत्रं जुहोति,' समिधो यजति ' इत्यादौ अग्निहोत्रादि शब्दानां नामत्वाङ्गीकरणे निमित्तं तत्प्रख्यशास्त्रम् । तत्प्रख्यं नाम= विधित्सितगुणप्रापकशास्त्रान्तरवत्वम् । सूत्रितं च= "तत्प्रख्यं चान्यशास्त्रम्" इति । अत्र प्रख्यपदस्य प्रख्यापकमित्यर्थः । तच्छब्दश्च गुणवाची । तथा च अग्निहोत्रादिपदैः विधित्सितः यः अग्न्यादिगुणः तत्प्रख्यापकस्य प्रापकस्य शास्त्रान्तरस्य 'अग्निर्ज्योतिर्ज्योतिरग्निः ' समिधः समिधो अग्न ' इत्यादेः सत्वात् एतैरपि गुणविधाने वैयर्थ्यं भवति इति अग्निहोत्रादिपदानि नामधेयत्वेनेष्यन्ते । उक्तं च—

विधित्सित गुणप्रापि शास्त्रमन्यद्यतस्त्विह ।
तस्मात् तत्प्रापणं व्यर्थं इति नामत्वमिष्यते ।। इति ।

'श्येनेनाभिचरन् यजेत ' इत्यादौ श्येनादिशब्दाः कर्मनामधेयं, तद्व्यपदेशात् । यद्यत्र श्येनशब्दः कपिञ्जलादिपदवत् श्येनपक्षिवाचक एव सन् यागाङ्गत्वेन तं विदध्यात्, तर्हि एतदर्थवादे ' यथा वै श्येनो निपत्य आदत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्य आदत्ते" इति भेदसमनियतोपमानोपमेयभावो न स्यात्, अभेदात् । न च वाक्यशेषे श्येनत्वावच्छिन्नप्रतियोगिकतया प्रतीयमानं

सादृश्यं श्येनत्वविशिष्टे गुणे अन्वेति विधेये। अभेदे सादृश्यासंभवात्। न चातानन्वयालंकार एव भवतु इति वाच्यम्। अनन्वये हि धर्मैक्यमावश्यकं, इह तु मत्स्यादानभ्रातृव्यादानरूपधर्मभेदेनानन्वयाप्रसारात्। अतः उपमाया एव स्वीकर्तव्यत्वात् तस्याश्च भेदनियतत्वात् श्येनशब्दः नामधेयमेव। तदा च कर्मपक्षिणोः भेदात् उपपन्नोऽर्थवादः। सूत्रितं चैतत् "तद्व्यपदेशं चे"ति। सूत्रे चैतस्मिन् तच्छब्दः 'यस्मिन् गुणोपदेशः (१-४-३) इति प्रकृतं गुणमभिधत्ते। व्यपदेशं' इत्यत्र विशब्दश्च भिन्नार्थकः, अतश्च तस्मात् विधेयत्वाभिमतात् गुणात् व्यपदेशः भेदेन निर्देशः आर्थवादिकः उपमानोपमेयभावसूचितः, कर्मनामत्वाभ्युपगमे निमित्तमिति। उक्तं च

यथा वै श्येन इत्युक्ताबुपमानोपमेयता।
नैकस्मिन् तेन गौण्यास्य वृत्त्या स्यात् कर्मनामता॥ इति।

स्मृतिरपि त्रैवर्णिकैः वेदप्रामाण्याभ्युपगन्तृभिः मन्वादिभिः प्रणीता 'अष्टकाः कर्तव्याः' इत्यादिः धर्मे प्रमाणम्। परंतु वेदमूलत्वेनैव एतासां स्मृतीनां प्रामाण्यमिष्यते। न तु वेदवत् साक्षात्। अतः स्मृत्या श्रुतिमनुमाय अनुमितश्रुतेरेव अनुष्ठानहेतुत्वं इति। उक्तं च 'स्मृतिशीले च तद्विदाम्' इति। अत्रोक्तं—

वैदिकैः स्मर्यमाणत्वात् तत्परिग्रह दार्ढ्यतः।
संभाव्यवेदमूलत्वात् स्मृतीनां वेदमूलता॥ इति।

वेदमूलत्वेन स्मृतीनां प्रामाण्याङ्गीकारादेव वेदविरुद्धायाः स्मृतेरप्रामाण्यमेव। अत एव औदुम्बरीवेष्टनस्मृतेः तत्स्पर्शश्रुति विरुद्धायाः अप्रामाण्यमित्युक्तम्॥

एवं आचारोऽपि धर्मबुद्ध्या वैदिकैरनुष्ठीयमानः धर्मे प्रमाणम्। अत्रापि पूर्ववत् शिष्टत्रैवर्णिकपरिग्रह हेतुना मूलश्रुत्यनुमाने बाधाभावात्। उक्तं च सूत्रकारैः—

"अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्" इति (१-३-७) अत्र 'कारणाग्रहणे' इति, अप्रामाण्यकारणस्य धर्मव्यतिक्रमादेरग्रहणे। प्रामाण्येन प्रतीयरन् आचारा अपि इत्यर्थः॥ इति।

एवं प्रथमाध्याये—

नामार्थवादविधिमन्त्रविभक्तवेदः तद्वत् स्मृतिश्च चरितं च निरस्तदोषम्।
धर्मे प्रमाणमिति सिद्धमतः परं तद्भेदप्रकार विनियोगफलादि-चिन्ता॥ इति।

। अथ द्वितीयाध्यायार्थः निरूप्यते ।

प्रथमेऽध्याये धर्मप्रमाणेषु निरूपितेषु एतदध्यायमारभ्य आद्वादशाध्यायं धर्मस्वरूपमेव (मेयं) विशिष्य निरूप्यते। तत्रास्मिन्नध्याये कर्मभेदः भावनाभेदोपयुक्तः प्रतिपाद्यते।

ननु केयं भावना नाम, किं च तस्याः लक्षणं? इति चेत्, भवितुः भवनानुकूलः भावयितुः व्यापारविशेषः भावना। सा च द्विविधा शाब्दी भावना आर्थीभावना चेति। लिङादिबोध्या शाब्दीभावना। तस्या एव प्रवर्तना प्रेरणा, विधिः इति पर्यायाः शब्दाः। तस्यां च भाव्यत्वेनान्वीयमाना, आर्थी भावना—कृतिः, प्रवृत्तिः यत्नः इत्यादि पर्यायाः। सा, आख्यातवाच्या।

त्रिविधोऽयं भावना अंशत्रयापेक्षिणी इति । [illegible] भाव्यांशः, करणांशः, इतिकर्तव्यतांशश्चेति त्रिविधाः । तत्र शाब्दीभावनायाः भाव्यांशापेक्षायाम् अनुष्ठानात्मकत्वात् आर्थीभावनाख्या प्रवृत्तिः (आर्थीभावना) भाव्यत्वेन संबध्यते । करणांशापेक्षायां लिङादिज्ञानं करणत्वेनान्वेति । इतिकर्तव्यतापेक्षायां च अर्थवादजन्यप्राशस्त्यादिज्ञानं प्रवृत्तिविधयोपकारकत्वात् इतिकर्तव्यतात्वेनान्वेति ।

आर्थीभावनायास्तु अंशत्रयापेक्षायां—स्वर्गादि फलानि भाव्यतया, करणापेक्षायां धात्वर्थः यागादीनि, करणत्वेन इतिकर्तव्यतापेक्षायां अश्रूयमाणफलकं प्रयाजाद्यङ्गजातं चेतिकर्तव्यतात्वेनान्वयं भजन्ति । इयमेव चार्थी भावना, कृतिः इत्यप्यभिधीयते । अस्याः अभिधायकः आख्यातप्रत्ययः । तत्र प्रमाणं च 'पचति' 'गच्छति' इत्यादेः 'पाकं करोति' 'गमनं करोति' इति विवरणम् । [illegible] धात्वर्थः पाकगमनपदाभ्यां विवृतः, तिप्रत्ययार्थ एव हि करोतिना विव्रियते । अत एव तिबर्थः कृतिरिति निश्चीयते । तस्याः (कृतेः) आर्थीभावनायाः 'भावप्रधानमाख्यातम्' इति यास्कस्मृतिसिद्धं मुख्यविशेष्यत्वरूपं प्राधान्यमपि । अनेन धात्वर्थातिरिक्ता भावना पदार्थ एव नास्तीति वादिनः वैयाकरणाः निरस्ता वेदितव्याः । 'पाकं करोति' इत्यादिविवरणे धात्वर्थाद्विविक्ततया कृतेर्विवरणात् कृतेर्धात्वर्थत्वासंभवात् । विस्तरस्त्वन्यत्र । अलमतिप्रसङ्गेन । [illegible] द्वितीयाध्यायस्यार्थः । तत्रेदं कर्मभेदप्रमाणं [illegible] निरूप्यते । कर्मभेदकप्रमाणानि च षट्, शब्दान्तरम् अभ्यासः [illegible] संख्या संज्ञा गुणः प्रकरणान्तरं चेति ।

(१) तत्र शब्दान्तरं नाम—अपर्यायधातुभेदः, भिन्नधात्वर्थकत्वं वा । यथा—सोमेन यजेत, हिरण्यमात्रेयाय ददाति ।

, दाक्षिणानि जुहोति' इत्यादौ, याग-दान, होम रूपधात्वर्थ (कार्य) भेदात् कारणभूतभावनाभेदोऽपीति ।

२) अभ्यासोनाम = अनन्यपरविधिपुनःश्रवणम् । यथा 'समिधो यजति' तनूनपातं यजति, इडो यजति, बर्हिः यजति, स्वाहाकारं यजति, इत्यादौ धातोरविकृतस्यैव श्रूयमाणत्वेऽपि विहितस्यैव, पुनर्विधाने वाक्यवैयर्थ्यापत्तेः धात्वर्थव्यतिरिक्तविधेया-भावेन 'दध्ना जुहोति' इत्यादिवत् सार्थक्यवर्णनस्याप्यसंभवात् पञ्चस्वपि वाक्येषु पञ्चयागाः विधीयन्ते । पूर्वोक्तरीत्या पञ्चयागेष्वपि कार्येषु तत्कारणीभूतभावनाभेदोऽपि ज्ञेयः ।

३) संख्या = उत्पत्तिवाक्ये कर्मसमानाधिकरणतया श्रूयमाणा कर्मभेदिका । यथा 'सप्तदश प्राजापत्यान् पशूनालभते ।' 'तिस्रः आहुतीर्जुहोति' इत्यादौ, सप्तदश त्रित्वादिसंख्यायाः स्वाश्रयप्रति-योगिक स्वाश्रयानुयोगिकभेदसमनियतायाः कर्मभेदकत्वम् । उत्पन्न वाक्ये श्रूयमाणायाश्च (एकत्वसंख्यान्यतिरिक्तायाः) संख्यायाः आवृत्त्यापादकत्वं, यथा, 'एकादश प्रयाजान् यजति' इत्यादौ एकादशत्वरूपायाः संख्यायाः ।

४) 'संज्ञा अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरे तेन सहस्रदक्षिणेन यजेत' इत्यत्र ज्योतिः विश्वज्योतिः, सर्वज्योति-रिति पदवाचिनां संज्ञानां एकस्मिन् कर्मणि निवेशायोगात् अथ शब्दस्य प्रकरणभेदसूचकस्य सद्भावाच्च ज्योतिरादिनामकानि त्रीणि कर्माणि विधीयन्ते । एतच्छब्दपरामृष्टानां ज्योतिरादिनाम्नां यजिना सामानाधिकरण्याच्च यागनामत्वनिश्चयः । ननु संज्ञायाः शब्दान्तरवत् अभिधानान्तरत्वेन अभिधेयार्थान्तरोपस्थापकत्वात् न शब्दान्तराद्भेदः संभवतीति वाच्यम् । शब्दान्तरं धातुभेदघटितं

भावनानुरञ्जकव्यापाररूपेण स्वार्थं बोधयत् स्वार्थानुरक्तायाः भावनायाः अन्यधात्वर्थानुरक्तभावनापेक्षया भेदं स्पष्टमेव बोधयेत् । संज्ञा तु प्रकृता न भावनानुरञ्जकव्यापारत्वेन स्वार्थं बोधयति, नामपदत्वात् । नाम्नश्च निष्पन्नाभिधान स्वभावत्वात् । अतः संज्ञा धात्वर्थभेदमात्रे व्याप्रियते । तद्भेदाच्च शब्दान्तरन्यायेन भावनाभेदः इति संज्ञा शब्दान्तरयोर्वैषम्यं सूक्ष्मेक्षिकया ज्ञेयम् ।

५) गुणः—पूर्वस्मिन् कर्मणि निवेशमलभमानः गुणः (द्रव्य देवतादिः) कर्मभेदकः । तत्रानिवेशश्च पूर्वकर्मणः प्रबलगुणावरोधात् । यथा चातुर्मास्येषु "वैश्वदेव्यामिक्षा" इति यागं विधाय आम्नाते 'वाजिभ्यो वाजिन' मित्यत्र वैश्वदेवयागस्य उत्पत्तिशिष्टद्रव्येणा-मिक्षाख्येन निराकांक्षीकरणात् उत्पन्नवाक्यस्थवाजिनस्य तत्र निवेशा-योगात् वाजिनद्रव्यकं कर्मान्तरमेव वैश्वदेवयागात् विधीयते । गुणस्य क्वचिद्वाक्यभेदापादकत्वादपि कर्मभेदकत्वम् । यथा 'यदाग्नेय' वाक्ये ।

६) प्रकरणान्तरात् कर्मभेदः यथा, कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोति' इत्यत्र विधीयमानः होमः प्रसिद्धाग्निहोत्रात् नैयमिकात् 'अग्निहोत्रं जुहोति' इति वाक्यविहिताग्निहोत्रहोमात् विलक्षणः इति । प्रकरणान्तरलक्षणं च 'अनुपादेयगुणविशिष्टानुप-स्थितिः' इति । पूर्वोक्तस्थले च 'चरित्वा' इतिक्त्वा प्रत्ययोपात्तकाल-रूपानुपादेयगुणयोगस्य अनुपस्थितेश्च (प्रकरणभेदात्) सत्वात् समन्वयः । 'सायं जुहोति' इत्यादावपि अनुपादेय गुणयोगस्य सद्भावेन होमान्तरप्रसक्तिवारणाय 'पौर्णमास्यां यजेत' इत्यादौ कर्मान्तरत्ववारणाच्च अनुपस्थितिरिति । तत्र चोपस्थितेरेव विद्यमान-त्वात् न कर्मभेदः इति । एवं षड्भिरपि प्रमाणैः कर्मभेदे सिद्धे कर्मभेदाविनाभूतभावनाभेदोपीति सिद्धम् ॥

। इति द्वितीयाध्यायार्थः ।

अथ तृतीयाध्यायार्थो निरूप्यते । तृतीये ध्याये शेषत्व-परपर्यायं शेषत्वं निरूप्यते । शेषत्वं नाम परार्थत्वमित्युक्तम् । अयमाशयः अत्र प्रकारः शेषः परार्थत्वादिति सूत्रे । शेषत्वं नाम परोद्देशप्रवृत्त-पुरुषार्थोपकारकत्वम् । स्वर्गोद्देशप्रवृत्तस्य पुरुषस्य तत्समवेत-व्यापारगोचरत्वस्य यागादौ सद्भावात् यागादेः स्वर्गाङ्गत्वम् । एव-मन्यत्रापि समन्वयः द्रष्टव्यः । कृष्यादौ अतिव्याप्तिवारणाय च विहितत्वे सतीति पूरणीयम् ।

एतादृशाङ्गता ग्राहकप्रमाणानि च षट् वर्तन्ते, श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या भेदात् ।

तत्र श्रुतिर्नाम अङ्गताग्राहकप्रमाणान्तरनिरपेक्षतया शक्त्या उद्देश्यत्वकरणत्वादिवाचकः शब्दः । स च द्वितीया तृतीयादि विभक्तिः । यथा व्रीहीन् प्रोक्षति दध्ना जुहोति इत्यादौ । अत्र व्रीहिनिष्ठोद्देश्यतायाः द्वितीयया प्रतिपादनात् परिशेषात् प्रोक्षणस्य विधेयस्य तदङ्गत्वम् । दध्नो हि तृतीयैव करणत्वबोधिका होमाङ्गत्वं बोधयति । इयं च श्रुतिः स्वेतरसमस्तप्रमाणापेक्षया प्रबला । निरपेक्षत्वात् । अन्येषां तु श्रुतिकल्पनयैव प्रमाणत्वम् ।

लिङ्गं नाम सामर्थ्यम् । तच्च द्विविधं शब्दगतं अर्थगतं चेति । अङ्गताग्राहकप्रमाणं लिङ्गं तु शब्दसामर्थ्यरूपमेव । यथा 'बर्हिर्देवसदनं दामि' इत्यादि मन्त्रे बर्हिर्लवनप्रकाशने सामर्थ्य सद्भावात् अस्य मन्त्रस्य श्रुतिकल्पनाद्वारा बर्हिर्लवनाङ्गत्वम् । अङ्गलक्षणघटकीभूतोद्देश्यत्वकीर्तिका शक्त्यान्यतरवाचकपदकल्पना तु मूला । कर्मपदार्थ-निष्ठयोर्यता लिङ्गं श्रुतिः तु खण्डदेवः । पदार्थविनियोगस्य योग्यता व्यवस्थापकत्वमात्रमेव यथा 'स्रुवेणावद्यति' 'स्वधितिना अवद्यति' इत्यादौ स्रुवाद्यर्थगतसामर्थ्यपर्यालोचनेन आज्यमांसाद्यवदानसाधनत्व

स्यैव प्रतीतेः अनियमव्याप्तेर्बलाभासमात्रसंपादकत्वम्, नत्वङ्गता-बोधोऽपीति पार्थसारथ्यादयः। अत एव प्रथमाध्याये 'अर्थाद्वा-कल्पना एकदेशत्वात्' इति सूत्रं दृश्यते, न तु तृतीये इति च तेषा-माशयः।

वस्तुतस्तु अर्थगतसामर्थ्यस्यापि अङ्गताग्राहकत्वाङ्गीकारे बलवतो बाधकस्यानुपलंभात् तस्यापि विनियोजकत्वं युक्तमेव। अत एव 'सूक्तवाके च कालविधिः परार्थत्वात्' इत्याद्यधिकरणाना-मुपपत्तिः तृतीयाध्याये।

इदं च लिङ्गं वाक्यापेक्षया बलवत्। अत एव 'स्योनं ते सदनं कृणोमि' इत्यादेः सदनाद्यङ्गत्वम्, न तु वाक्यात् सादनाङ्गत्वम्।

३) वाक्यम्। उद्देश्यविधेयत्वाचकपदयोः उद्देश्यता विधेयतावाचक द्वितियादिप्रत्ययरहितयोः सहोच्चारणं वाक्यम्। यथा 'धेनुर्दक्षिणा' उच्चैः ऋचा क्रियते। 'पर्णमयीजुहूः' इत्यादिस्थलेषु धेनुऋक्जुह्वादिपदानां उद्देश्यत्वेनान्वययोग्यार्थबोधकानां, धेनुः उच्चैः, पर्णमयी' इत्यादीनां विधेयार्थबोधकानां पदानां समभि-व्याहारात्, योग्यतां पर्यालोच्य, धेन्वादक्षिणां भावयेत्' इत्यादि श्रुतिकल्पनया धेन्वादीनां दक्षिणाद्यङ्गत्वम्। इदं प्रकरणापेक्षया प्रबलम्। अत एव सूक्तवाकमन्त्रे 'इन्द्राग्नी इदं हविरजुषतां' इत्यत्र 'इदं हविरजुषतां' इत्यादीनां न प्रकरणात् सर्वाङ्गत्वं, अपि तु, अग्नीषोमीयाद्यङ्गत्वमेव, तदपेक्षया प्रथमप्रवृत्तात् वाक्यात्।

(४) प्रकरणं, अङ्गप्रधानयोरुभयोर्विद्यमाना आकाङ्क्षा। प्रधानस्या-काङ्क्षा इति कर्तव्यता(उपकारक)विषये अङ्गानां आकांक्षा भाव्यविषयिणी। फलाश्रवणात्। यथा दर्शपूर्णमासयोः श्रुतानां प्रयाजानां अनिर्दिष्ट-

फलानां अत एव भाव्यापेक्षावतां, प्रधानयोश्च दर्शपूर्णमासयोः फलसाधकयोः अत एव उपकारकांक्षावतोः एकवाक्यतापरिकल्पनया समिदादीनां दर्शपूर्णमासाङ्गत्वसिद्धिः । इदं च प्रकरणं द्विविधं, महाप्रकरणं, अवान्तरप्रकरणं चेति । पूर्वं निरूपितं महाप्रकरणम् ।

अङ्गभावनासंबन्धिप्रकरणं अवान्तरप्रकरणम् । यथा प्रयाज समीपे श्रुतेन 'अभिक्रामं जुहोति' इति वाक्येन विधीयमानस्य अभिक्रमणस्य अवान्तरप्रकरणात् प्रयाजहोममात्राङ्गत्वं, न तु महाप्रकरणात् सर्वहोमाङ्गत्वमपीति । इदं च स्थानात् बलीयः । अत एव राजसूये अभिषेचनीयाख्यसोमयागसन्निधौ श्रुतानामपि विदेवनादीनां न सन्निध्यात्मकात् स्थानात् अभिषेचनीयमात्राङ्गत्वम् । अपि तु प्रकरणात् राजसूयाङ्गत्वम् ।

(5) स्थानं नाम क्रमः, सन्निधिरिति यावत् । तेनापि अङ्गत्वं ज्ञायते । यथा दर्शपूर्णमासयोरुपांशुयाजक्रमे पठितस्य 'दब्धिरसि' इति मन्त्रस्य सन्निध्यात्मकात् स्थानात् उपांशुयागाङ्गत्वमेव नतु सर्वयागाङ्गत्वम् ।

स्थानं चेदं समाख्यापेक्षया प्रबलम् । तस्मादेव 'शुन्धध्वं दैव्याय कर्मणे' इति मन्त्रस्य दर्शपूर्णमासयोः पौरोडाशिक समाख्याते काण्डे पठितस्य न समाख्यया पुरोडाशपात्राङ्गत्वम् । अपि तु सन्निधानात् सान्नाय्यपात्रप्रोक्षणाङ्गत्वमिति ।

(6) समाख्या = यौगिकः शब्दः । दर्शपूर्णमासादिषु आध्वर्यव, हौत्र, औद्गात्रादि समाख्याताः पदार्थाः संबन्धनिमित्तकया समाख्यया अध्वर्युप्रभृतिभिरेवानुष्ठेयाः इति अध्वर्यु, होतृ, उद्गातॄणां तत्तत्पदार्थाङ्गत्वम् । इयं सर्वापेक्षया दुर्बला । एतैः षड्भिः प्रमाणैः पाराध्येयापरपर्यायं अङ्गत्वं ज्ञायते ।

अङ्गं च द्विविधं गुणकर्म-प्रधानकर्म चेति। तयोरेव सन्निपत्योपकारकं, आरादुपकारकं इति च पर्यायः। द्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकं; यथा—व्रीहीन् प्रोक्षति, व्रीहीन-वहन्ति। तण्डुलान् पिनष्टि' इत्यादिः। इदमेव संस्कारकर्मेत्य-पिचोच्यते। तच्च द्विविधं, उपयुक्तसंस्कारः, उपयोक्ष्यमाण संस्कारश्चेति। आद्यं 'इडाभक्षणादि। अन्त्यं पूर्वोक्तावघातादि। उभयमपि द्रव्यप्रधानकं कर्म अत एव गुणकर्मेतिनाम। यस्तु धात्वर्थः फलसंबंधरहितः अदृष्टार्थमेव विधीयते। तत् आरादुपकारकं अङ्गमिति। यथा प्रयाजानूयाजादि॥

इति तृतीयाध्यायार्थः।

। अथ चतुर्थाध्यायार्थः।

चतुर्थेचाध्याये प्रयोज्यप्रयोजकभावः निरूप्यते। तत्र प्रयोज्यत्वं नाम परोद्देशप्रवृत्तकृतिव्याप्यत्वम्। कृतिव्याप्यत्वं चात्र अनुष्ठाप्यत्वम्। अत एव कालादेः न प्रयोज्यत्वसंभवः। प्रयाजादीनां दर्शपूर्णमासयागाद्युद्देशप्रवृत्तपुरुषसमवेतकृतिव्याप्य-त्वस्य सद्भावात् प्रयाजादेः दर्शपूर्णमासप्रयुक्तत्वम्। प्रायशः प्रयोज्य-प्रयोजकभावः, शेषशेषिभावश्च समानाधिकरणतयैव उपलभ्येते। कुत्रचित्तु न तथा, यथा पुरोडाशकपाले-तुषोपवापाङ्गत्वसत्त्वेऽपि तत्प्रयोज्यत्वाभावः, नैमित्तिकभेदनहोमादेः निमित्तप्रयोज्यत्वेसत्यपि निमित्तनिरूपिताङ्गत्वाभावः इति। अत एवाध्यायभेदोऽपि संगच्छते।

यन्निष्ठकृतिव्याप्यतानिरूपितोद्देश्यताश्रयत्वं यस्य तस्य तत्प्रयोजकत्वं इति प्रयोजकलक्षणम्। प्रयाजानिष्ठकृतिव्याप्यता-

निरूपितोद्देश्यताशालित्वस्य दर्शपूर्णमासादौ दर्शपूर्णमासनिष्ठकृतिव्याप्यतानिरूपितोद्देश्यताशालित्वस्य स्वर्गादौ च सद्भावात् प्रयाजदर्शपूर्णमासादीनां प्रति दर्शपूर्णमासस्वर्गादेः प्रयोजकत्वमिति समन्वयः ॥

।अथ पञ्चमाध्यायार्थः।

अनुष्ठाप्यत्वरूपे प्रयोज्यत्वे निरूपिते अनुष्ठानं चानेकपदार्थानां न युगपद्भावीति केन क्रमेणेत्यपेक्षायां अनुष्ठानौपयिकः क्रमः पञ्चमाध्याये प्रतिपाद्यते। तत्र कोऽयं क्रमः, कानि च तत्र प्रमाणानि? कतिचेत्यादिकमप्यत्र निरूप्यते।

तत्र क्रमो नाम 'अव्यवहितोत्तरत्वरूपमानन्तर्यम्' तच्च एकप्रतियोगिकं एकवृत्ति। यथा 'वेदं कृत्वा वेदिं करोति' इत्यत्र वेदकरणप्रतियोगिकमानन्तर्यं वेदिकरणवृत्ति इति समन्वयः। नन्वव्यहितेति कुतः इति चेत् 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' त्यनेनवाक्येन दर्शपूर्णमासोत्तरत्वस्य सोमे बोधनात् तत्र क्रमलक्ष्यावृत्त्यर्थत्वात्। अयं च क्रमः-श्रुति-अर्थ, पाठ-स्थान, मुख्य प्रवृत्तिरूपै षड्भिः प्रमाणैरवगम्यते।

(१) तत्र श्रुतिर्नाम वृत्त्या क्रमबोधक क्लृप्तः शब्दः। यथा 'हृदयस्याग्रे अवद्यत्यथजिह्वायाः' इत्यादौ 'अथ' शब्दः। 'वेदं कृत्वा वेदिं करोति' इत्यादौ च 'क्त्वा' प्रत्ययः॥ अथ शब्दस्य शक्त्या, 'क्त्वा' प्रत्ययस्य च लक्षणया आनन्तर्यरूपक्रमवाचित्वमिति समन्वयः। पाठादावतिव्याप्तिवारणाय क्लृप्त इति। इयं श्रुतिः स्वेतरसर्वप्रमाणापेक्षया बलवती क्लृप्तशब्दरूपत्वात्।

२) अर्थः—प्रयोजनम् । यत्र प्रयोजनवशेन क्रमः निर्णीयते तत्र अर्थात् । यथा 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इत्यत्र यवागूपाकस्य यथा पाठं पश्चात् अनुष्ठाने पाकनिष्पादितायाः यवाग्वाः होमरूपस्य अर्थस्य 'यवाग्वा अग्निहोत्रं जुहोति' इति वचनेन ज्ञापितस्य असंभवात् तदन्यथानुपपत्त्या पूर्वं पाकः पश्चात् होमः इति निर्णयः । अतः अर्थाधीनः क्रमः । अयं च पाठापेक्षया बलीयान् । बलीयस्त्वं चानुपदमेवोपपादितम् ॥

३) पदार्थबोधकवाक्यं पाठक्रमाधीनः यत्र पदार्थानां क्रमः तत्र पाठक्रमः—यथा 'समिधो यजति' 'तनूनपातं यजति' इति पञ्चभिर्वाक्यैः विहितानां समिदादीनां पञ्चानां प्रयाजानां, तद्विधायक वाक्य क्रमेणैव क्रमनिर्णयः इति ॥

४) स्थानं नाम उपस्थितिः—यद्देशे यस्य प्रथमं उपस्थितिः तस्यैव प्रथमतः अनुष्ठानम् । यथा श्येने 'सह पशूनालभते' इति श्रुतम् । तत्र पश्वङ्गभूतानामुपाकरणादीनां प्रतिपशु भेदेन अनुष्ठेयानां क्रमे किं अनियमः ? उत अग्नीषोमीयपशोः प्रथममुपाकरणं प्रकृतिवत् ? अथवा सवनीयोपाकरणस्यैव प्राथम्यं ? उपस्थितेरिति संदेहे नियामकप्रमाणादर्शनात् अनियमः, प्रकृतिदर्शनाद्वा अग्नीषोमीयस्यैव प्राथम्यमिति चेत् ।—सवनीय पशोरेव प्राथम्यं, स्थानात् । सवनीयपशुर्हि 'आश्विनं ग्रहं गृहीत्वा......सवनीय पशुमुपाकरोति' इति वाक्येन प्रकृतौ आश्विनग्रहग्रहणानन्तरं विहितः । श्येनेऽपि आश्विनग्रहविधायकवाक्यानन्तरं 'सह पशून्' इत्यस्य पाठात् आश्विनस्य सवनीयोपस्थितिजनकस्य सद्भावेन सवनीयस्यैव प्रथममुपाकरणम् । न तु दैक्षस्यापि, तदुपस्थापकस्य भ्रष्टत्वेन स्थानाभावात् । अनन्तरं अग्नीषोमीयानुबन्ध्ययोः । तयोर्मध्ये अग्नीषोमीयस्यैव

प्राबल्यम् । प्रकृतिदृष्टक्रमस्यैव नियामकत्वात् । एवं च स्थानातिक्रमसाम्यं च । अग्नीषोमीयानुबन्ध्ययोरुभयोरपि स्वस्वस्थानातिक्रमतौल्यात् ।

प्रवृत्तिक्रमस्तु आद्यपदार्थस्य प्रवृत्तिं पर्यालोच्य तदुत्तरभाविनां अङ्गानां क्रमस्वीकरणे—यथा वाजपेये 'सप्तदश प्राजापत्यान् पशूनालभते' इति वाक्यविहितेषु सप्तदशपशुयागेषु अङ्गभूतानां पशूनां संस्काराः ये उपाकरणनियोजनपर्यग्निकरणात्मकाः तेषां अनुष्ठाने हि प्रथमं उपाकरणं सर्वेषां पशूनां अनुष्ठाय, तत्क्रमेणैव द्वितीयमङ्गं नियोजनं, तृतीयं च पर्यग्निकरणं, नियोजनप्रवृत्त्येति सिद्धान्तः कृतः । अत्र प्रथमाङ्गप्रवृत्त्या द्वितीयस्याङ्गस्य क्रमस्वीकारात् प्रवृत्तिक्रमः ॥

अत एव हि त्रयाणामप्येषां उपाकरणादीनां कालव्यवधानतौल्यम् ॥

प्रधानक्रमपर्यालोचनपूर्वकं यत्र अङ्गानां क्रमस्वीकरणं तत्र मुख्यक्रमः । यथा दर्शपूर्णमासयोः आग्नेयहविषः पुरोडाशस्य प्रथमं प्रयाजशेषेणाभिघारणं, ततः ऐन्द्रस्य दध्नः सान्नाय्यस्येति अभिघारणक्रमः प्रधानभूताग्नेयसान्नाय्याधीन इति । एवं षडपि प्रमाणानि संग्रहेण निरूपितानि । एतेषां प्राबल्यदौर्बल्यभावेपि अङ्गताग्राहकप्रमाणेषु प्रदर्शितदिशा पूर्वपूर्वप्राबल्यमुत्तरोत्तरस्य च दौर्बल्यम् ॥

। इति पञ्चमाध्यायार्थः ।

॥ अथ षष्ठाध्यायार्थः ॥

अस्मिन्नध्याये सक्रमस्य प्रयोज्यस्य निरूपणानन्तरं अधिकारो निरूप्यते। अधिकारोनाम—"प्रवृत्तिप्रयोजकफलेच्छाफलान्यतर समानाधिकरणं कर्तृत्वम्"। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते" ति वाक्यप्रतिपादिते यागकर्तरि यजमाने फलसमानाधिकरणस्य कर्तुत्वस्य सद्भावात् स अधिकारी। फलाश्रयत्वं अधिकारः इत्येवोक्तौ श्राद्धादौ पित्रादेरधिकारापत्तिः, तद्व्यावृत्तये, कर्तृत्वमपि। तावन्मात्रोक्तौ ऋत्विजामप्यधिकारापत्तिः, तन्निरासाय फलसमानाधि करणेति। ऋत्विजां च दक्षिणास्वीकारात् फलसमानाधिकरण कर्तृत्वाश्रयत्वेन अतिप्रसङ्गपरिहाराय-प्रवृत्तिप्रयोजकेति फलविशेषणम्। एवमपि जातेष्टौ, पुत्रगतफलार्थं पित्रा अनुष्ठेयायां कर्तुः पितुः प्रवृत्ति प्रयोजकफलाश्रयत्वाभावेन अधिकारो न स्यात् इति तत्संपादनाय 'प्रवृत्तिप्रयोजकफलेच्छाफलन्यतरे' ति। तथा च तत्र फलस्यान्यनिष्ठत्वेऽपि फलेच्छायाः पितृनिष्ठत्वात् पितुरधिकाराविघातः। एवं श्राद्धे पुत्रस्यापि। एतादृशश्चाधिकारः कुत्र केषामिति विशेषेण निरूपणमेवास्मिन् अध्याये क्रियते।

॥ सप्तमाध्यायार्थः ॥

पूर्वं षड्भिरध्यायैः उपदेशे निरूपिते तदधीनसिद्धिरतिदेशः सप्तमे अष्टमे च निरूप्यते। तत्र उपदेशो नाम अङ्गानां प्रत्यक्षपाठः। अतिदेशो नाम स व्यापारः यः अन्याङ्गत्वेनावगतानां पदार्थानां तत्संबन्धादरेण इतराङ्गतां बोधयति॥ उक्तं च—

प्राकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु।
धर्मातिदेशो येनांस्यात् सोऽतिदेश इति स्मृतः॥ इति।

नवीनास्तु—पूर्वाङ्गिसंबन्धित्वावच्छेदकैकोपकारद्वारकपदार्थनिष्ठान्यङ्गताबोधकं प्रमाणं अतिदेशः इति वदन्ति। 'प्रकृतिवद्विकृतिः कर्तव्या' इत्येवमादिवाक्यं हि, प्रयाजादिपदार्थानां यादृशोपकारद्वारा आग्नेयाद्यङ्गत्वमवधारितं, तादृशोपकारद्वारैव आग्नेयादिसंबन्धित्वरूपेण सौर्याद्यङ्गत्वं बोधयति इति तत्र समन्वयः। अत्र पूर्वाङ्गिसंबन्धित्वस्य अविवक्षितत्वे दर्शपूर्णमासादीनां स्वर्गाद्यङ्गानामपि तेन रूपेण पापक्षयाङ्गत्वस्यापि यावज्जीवादिवाक्यैरवगतत्वात्, तद्वाक्येष्वतिव्याप्तिरिति तदावश्यकता। तदा तु न हि दर्शादेः स्वर्गसंबन्धित्वेन रूपेण पापक्षयार्थत्वं इत्यत्र प्रमाणं किञ्चित्। अतो न दोषः। एकोपकारद्वारेत्यस्याभावे—पुरोडाशकपाले तुषोपवापाङ्गत्वस्य पुरोडाशसंबन्धित्वरूपेणैव स्वीकारात् तुषोपवापाङ्गत्वबोधकवाक्ये अतिव्याप्तिः। एतद्दलनिवेशेच कपालस्य स्वप्रयोजकश्रवणाधिकरणत्वेन पुरोडाशं प्रति, स्वाप्रयोजकतुषोपवापकरणत्वेन तुषोपवापं प्रति चान्वय इति द्वारभेदात् नातिव्याप्तिः॥

अयं चातिदेशः त्रिविधः—प्रत्यक्षवचनातिदेशः, नामातिदेशः, कल्पितवचनातिदेशश्चेति। 'एतद्ब्राह्मणान्येव पञ्चहवींषि यद्ब्राह्मणानीतराणि' इति चातुर्मास्यप्रकरणस्थवाक्यं प्रत्यक्षवचनातिदेशः—अत्र वचनेनैव आदिमयागत्रयाङ्गानां इतरपञ्चयागाङ्गत्वबोधात् प्रत्यक्षवचनातिदेशत्वम्। 'मासमग्निहोत्रं जुहोति' इति वाक्यविदिते कौण्डपायिनामग्निहोत्रे नैयमिकाग्निहोत्रधर्माणां अतिदेशः सनामकत्वेन नामातिदेशात्। कल्पितवचनातिदेशस्तु लक्षणसमन्वयप्रदर्शनवेलायामेव निरूपितः। एतेषु प्रत्यक्षवचनातिदेशः सर्वप्रबलः। स्थानापत्त्यतिदेशः आश्रयतो धर्मातिदेशः इति अतिदेशौ द्वौ अपरावपि निरूपितौ कैश्चित्॥

। अथ अष्टमाध्यायार्थः ।

पूर्वस्मिन् अध्याये प्रकृतिधर्माः विकृतौ अतिदिश्यन्ते इत्युक्तम् । इदानीं तु कस्य धर्माः कुत्र अतिदिश्यन्ते इति विशेषतो निरूपणं क्रियते अस्मिन्नध्याये । अत एव चात्र अध्याये आदिमसूत्रं ‘अथ विशेषलक्षणम्’ इति । प्रकृतिविशेषनिर्णयश्च विकृतिगत (लिङ्गात्) साहश्यात् । यथा आग्नेयस्य धर्माः सौर्ये अतिदिश्यन्ते । निर्वपतिः, तद्धितेन देवतानिर्देशः, एकदेवताकत्वं, औषधद्रव्यकत्वं, इत्यादीनि सौर्ये विद्यमानानि आग्नेयप्रकृतिकत्वं निश्चाययन्ति । एवं, इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः औषधद्रव्यत्वात् । पशौ च अग्नीषोमीये सान्नाय्यविकृतित्वं पशुप्रभवद्रव्यकत्वात् । इतरपशूनां च अग्नीषोमीयविकृतित्वं, प्राणिद्रव्यकत्वात्, ऐकादशिनेषु [redacted], सुत्याकालिकत्वात्, रशनाद्व्योपेतत्वात्, सौत्रामण्यादिषु पशुगणेषु ऐकादशिनविकृतित्वं गणत्वसामान्यात् ॥

अव्यक्तविश्वजिदादिषु च सोमविकृतित्वं, स्वार्थचोदितदेवतारहितत्वरूपाव्यक्तत्वसद्भावात् ॥

द्विरात्रादिष्वहर्गणेषु च द्वादशाहविकृतित्वं गणत्वसादृश्यसाधिकस्यसद्भावात् । एवमन्यत्रापि तत्तद्यागगतधर्मसादृश्यमादाय प्रकृतिविशेषनिर्णयः अष्टमाध्यायसाध्यः । प्रसङ्गात् फलादीनामतिदेशाविषयत्वमपि निरूप्यते ॥

। अथ नवमाध्यायार्थः ।

नवमेचाध्याये अतिदिष्टानां पदार्थानां द्वारान्तरसंबन्धनिमित्तान्यथाभावात्मकः ऊहः निरूप्यते । स च त्रिविधः, मन्त्रोहः, सामोहः, संस्कारोहश्चेति । आद्यो यथा ‘अग्नये जुष्टं निर्वपामि’

इति प्रकृतिसंबन्धिनः निर्वापप्रकाशकस्य मन्त्रस्य सौर्ये विकृतियागे अतिदेशप्राप्तस्य प्राकृतद्वारस्य अग्निप्रकाशनस्यायोगात् सूर्यप्रकाशनाय सूर्ययित्यन्यथाभावात्, 'सूर्यायत्वा जुष्टं निर्वपामी'त्यूहः क्रियते इति।

द्वितीयो यथा 'रथन्तरमुत्तरयोर्गायति' इत्यत्र रथन्तर साम्नः योनिकायां यादृशाक्षराभिव्यञ्जकत्वमासीत् तद्विलक्षणतया उत्तरयोः अभिव्यङ्ग्यान्तरस्वीकारात् द्वारान्तरसंबन्धः इति सामोहे समन्वयः। तृतीयस्तु=संस्कारोहः=, व्रीहीनवहन्ति' इति वाक्य विहितावघातस्य प्राकृतस्य विकृतौ नीवारद्रव्यकयागे, नीवाररूप द्वारान्तरसंबन्धसत्त्वात् वैकृतावघाते द्रष्टव्यः॥

॥ दशमाध्यायार्थः ॥

अतिदिष्टपदार्थविषयकोहस्य निरूपणान्तरं अतिदिष्टपदार्थविषय बाधः अस्मिन्नध्याये निरूप्यते। तत्र बाधोनाम अननुष्ठानं, अनुष्ठानं च प्रमाणाधीनम्। प्रमाणाभावेत्त्वनुष्ठानं न भवति। प्राकृतस्य पदार्थस्य विकृतौ अनुष्ठाने प्रमाणं चातिदेश एव। अतिदेशश्चोपकारपृष्ठभावेनैव पदार्थान् प्रापयति उपकारासंभवे च अतिदेशः प्राकृतपदार्थप्रापकप्रमाणं न भवति। अत एव बाधस्य लक्षणमेव-मुक्तं='प्रकृतिसंबन्धिनः पदार्थस्य विकृत्यङ्गताग्राहकप्रमाणाभावः बाधः' इति। यथा कृष्णलेषु प्राकृतावघातस्य वितुषीभावरूपोप-काराभावात् अवघातविषये अतिदेशः प्रमाणं न भवति इति समन्वयः॥

'बाधश्च त्रिविधः, प्रत्याम्नानात्' प्रतिषेधात्, अर्थलोपाच्चेति। तत्र आद्यो यथा 'शरमयं बर्हिर्भवति' इति विकृतिप्रकरणे बर्हिः कार्ये शराणां आम्नातत्वेन कुशानां बाधः इति॥

'न ब्रह्मा सामानि गायति' 'न तौ पशौ करोति' 'न होतारं वृणीते' इत्यादौ होतृवरणादेः प्राकृतपदार्थस्य विकृतौ अतिदेशेन प्राप्यमानस्य प्रतिषेधात् तस्य बाधः इति ॥

प्राकृतावघातस्य कृष्णलेषु 'स्वर्णतण्डुलेषु' वितुषीभावरूपप्रयोजनासंभवात् अर्थलोपात् बाधः इति । एवं त्रिविधोऽपि बाधः अस्मिन् दशमाध्याये सप्रपञ्चं निरूपितः परिदृश्यते ॥

॥ अथ एकादशाध्यायार्थः ॥

एवं दशभिरध्यायैः प्रकृतौ विकृतौ च अनुष्ठेयपदार्थेष्ववगतेषु प्रयोगविधिना अवगतं तन्त्रं निरूप्यते । विधिस्तावच्चतुर्विधः । उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति ।

(1) कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिः यथा 'अग्निहोत्रं जुहोति' इति । उत्पत्तिविधौ च सर्वत्र भावनायामाख्यातोपात्तायां धात्वर्थस्य करणत्वेनैवान्वयो भवति अग्निहोत्रहोमेनेष्टं भावयेदिति ।

(2) अङ्गाङ्गिभावसंबन्धबोधको विधिः विनियोगविधिः—यथा—'दध्ना जुहोति' इति । अत्र दध्नः करणत्वेनान्वयः धात्वर्थस्य च कर्मत्वेन । अयमेव गुणविधिरित्युच्यते । क्वचित्तु धात्वर्थस्य न कर्मत्वेन, नापि करणत्वेनान्वयः अपि त्वाश्रयत्वेन यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इति । अत्र दध्नः गुणस्य करणत्वेन, इन्द्रियाणां च फलत्वेनान्वयात् धात्वर्थः आश्रयत्वेनान्वयं भजते होमाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेदिति वाक्यार्थः ।

(3) फलस्वाम्यबोधको विधि अधिकारविधिः—यथा, ज्योतिष्टोमेन स्वर्गकामो यजेत 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्येवमादिः ॥

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। यथा 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यादिः। फलसाधनत्वेनाम्नातं प्रधानं कर्म उपकारकपदार्थमपेक्षते। अङ्गानां तु यत्किञ्चित् फलार्थतया अनवगतानां अत एव भाव्यापेक्षावतां तच्छान्त्यर्थं उपकाराकांक्षावत्प्रधानेनान्वयः स्वीक्रियते। तत्र च खलेकपोतन्यायेन युगपत् सर्वेषामङ्गवाक्यानां प्रधानोत्पत्तिवाक्यैकवाक्यत्वमङ्गीकृत्य समिदाद्यङ्गोपकृतेन प्रधानेनेष्टं भावयेत् इति विधिः स्वीक्रियते। अयमेव विनियोगविधिरित्युच्यते। अनन्तरं 'साङ्गैः पौर्णमासी संज्ञकैः प्रधानैः इष्टं भावयेत् इति कश्चन विधिराश्रीयते। अयमेव च प्रयोगविधिरित्युच्यते। अनेन च अङ्गानां प्रधानानां अविलंबापरपर्यायप्राशुभावोप्याक्षिप्यते। प्राशुभावश्च तन्त्रेणानुष्ठाने स्पष्ट इति प्रयोगविध्यवगततन्त्रनिरूपणं क्रियते इत्युक्तम्॥

तत्र 'अनेकोद्देशेन सकृदनुष्ठानं' तन्त्रम्। यथा दर्शपूर्णमासयोः समुदायद्वयघटकीभूताग्नेयादियाग त्रिकोद्देशेन सकृदेव प्रयाजाद्यङ्गानामनुष्ठानात् तन्त्रत्वमिति। तथा हि दर्शपूर्णमासनामक कर्मणि, दर्शनामकः एकः समुदायः आग्नेय सान्नाय्ययागद्वयरूपयागत्रयघटितः; एवं आग्नेयोपांशुयाजाग्नीषोमीयरूपयागत्रयघटितः पूर्णमासनामकः अपरस्समुदायः इति द्वौ समुदायौ वर्तेते। तत्प्रकरण एव 'समिधो यजति' तनूनपातं यजति, 'इडो यजति 'बर्हिर्यजति' 'स्वाहाकारं यजति' इति पञ्चाभिर्वाक्यैः पञ्च प्रयाजा विधीयन्ते। तत्र प्रयाजानां एषां न प्रत्येकं एकैकयागार्थं षड्वारमनुष्ठानम्। अपि तु, एकैकसमुदायारंभकयागत्रयस्यापि अगृह्यमाणविशेषत्वादुद्देश्यतामङ्गीकृत्य यागत्रयोद्देशेनापि सकृदेवानुष्ठानमिति। अत्र प्रयाजानां तन्त्रेणानुष्ठितत्वमिति। विशिष्य तत्तद्यागोद्देशेन विहितत्वरूपगृह्यमाणविशेषत्वेतु आवृत्तिरेवाङ्गानामिति ज्ञेयम्।

। अथ द्वादशाध्यायार्थनिरूपणम् ।

गृह्यमाणविशेषत्वेऽप्यन्यतः उपकारलाभे प्रसङ्गेन कार्यसिद्धेर्नाङ्गावृत्तिः इति प्रसङ्गः द्वादशे निरूपितः । तत्र प्रसङ्गो नाम—

'अन्यतः उपकारलाभप्रयुक्ताङ्गाननुष्ठानम्' यथा पश्वङ्गभूत पशुपुरोडाशयागे अग्नीषोमीयविकृतिभूते पश्वर्थानुष्ठितप्रयाजैरेवोपकारलाभात् न पुनः पशुपुरोडाशार्थं प्रयाजानुष्ठानम् । एवं 'गोदोहनेन पशुकामस्य प्रणयेत्' इति वाक्यविहितेन गोदोहनेनैव फलार्थेन जलानयनरूपकार्यस्यापि चमससाध्यस्य लाभात् न चमसस्वीकरणमिति चमसे प्रसङ्गसिद्धिः द्रष्टव्या । 'अङ्गाननुष्ठानं प्रसङ्गः' इत्येतावन्मात्रोक्तौ बाधस्थलेऽपि (कृष्णलादौ अवहननस्य) अतिव्याप्तिः—तद्वारणाय उपकारलाभप्रयुक्तत्वान्तम् । तन्त्रे अग्नेयाद्यर्थानुष्ठित प्रयाजजन्योपकारलाभेऽपि अगृह्यमाणविशेषतया तदनुष्ठानस्य सर्वसाधारणत्वेन अग्नीषोमीयार्थमुपकारलाभप्रयुक्ताननुष्ठानाभावान्नातिप्रसङ्गः इति लक्षणं सुस्थम् ॥

एवं द्वादशभिरध्यायैः सप्रमाणं धर्मो निरूपितः । धर्मश्च विहितं यागादिकं कर्मैवेति आदौ निरूपितम् । ननु यागादेः क्षणिकस्य क्रियारूपस्य कथं कालान्तरभाविस्वर्गसाधनत्वं, आशुतरविनाशित्वात् इति चेत् ॥

ब्रूमः. अपूर्वं स्वीकृत्य श्रुतयागसाधनतायाः निर्वाहात् दोषाप्रसक्तेः । ननु यागस्यैव हि स्वर्गसाधनत्वं श्रुतं नान्यस्य, तत् कथं अन्यस्य स्वीकारः ? वस्त्वन्तरं हि कल्प्यमानं स्वर्गसाधनं यागसाध्यं वा इति स्वीकर्तव्यम् । उभयथाऽपि श्रुतिविरोधः स्वर्गयागयोरेव साध्यसाधनभावश्रवणात् ॥

स्यादेतत्—कथं पुनः क्षणिकस्य कर्मणः अपूर्वेण विना कालान्तरभाविकफलसाधनत्वं, अतः अपूर्वकल्पनमिति ।—नस्यात् अपूर्वे कल्पितेऽपि कथं यागसाधनत्वस्य श्रुतस्य निर्वाहः ? अपूर्वं हि तदा फलसाधनं भवेत् , न यागः । अतः न अपूर्वकल्पनमुपपत्तिमत् ।

अथ स्यात्—अपूर्वं हि यागस्य शक्तिः अवान्तरव्यापारो वा इति स्वीक्रियते, अतः न विरोधः इति । नेदं युक्तं वा शक्तिमति व्यापारवति, अतीते शक्तिः व्यापारो वा वर्तते इत्यस्य लोके क्वाप्यदर्शनात् यागे नष्टे अपूर्वस्यापि नाशापत्तेः । अतः नष्टोऽपि याग एव फलं साधयति । अथवा फलपर्यन्तं वा याग एवावतिष्ठते इति शास्त्रप्रामाण्यादभ्युपगन्तव्यम् । एवं च न अपूर्वसिद्धिरिति चेन्न—स्वर्गसाधनत्वस्य श्रुतस्य अन्यथाऽनुपपत्त्या हि अपूर्वं परिकल्प्यते । यागस्य स्थैर्यं, विनष्टस्यापि फलसाधकत्वं इति तु लोकविरुद्धत्वादुपेक्ष्यमेव । अतः अपूर्वकल्पनमेवोपपत्तिमत् । न च तर्हि श्रुतयागसाधनत्वस्य विरोधः अपूर्वस्यैव तर्हि स्वर्गसाधनत्वापत्तेः इति वाच्यम् । यागस्य शक्तिः व्यापारो वा अपूर्वमिति स्वीकरणेन, शक्त्या शक्तिमतो, व्यापारेण व्यापारिणो वा अन्यथासिद्धेरसंभवात् । न हि चक्रभ्रमणेन दण्डव्यापारेण घटं प्रति दण्डस्यान्यथासिद्धिर्भवति । अतः न श्रुतयागनिष्ठस्वर्गसाधनत्वस्य विरोधगन्धोऽपि ॥

ननूक्तं—यागे नष्टे शक्तिः व्यापारो वा अपूर्वं कथं स्थातुं शक्नुयात् ? शक्तिमतः व्यापारवतो वा पदार्थस्याभावे शक्तेर्व्यापारस्य वा स्थानायोगात् इति—

सत्यमुक्तं, दुरुक्तं तत्—कार्यानुमेया हि शक्तिः यत्र स्थिता कार्यायालं तत्रैवानुमीयते । एवं च सुखानुभवस्य तत्क्षणोत्पत्तेरुदयात्

यागशक्तिरप्यात्मन्येव वर्तते इत्यविरोधात् । अवान्तरव्यापारत्वं नाम 'समीहितोद्देशप्रवृत्तेन साधनेन तत्सिद्ध्यर्थमन्तरा साध्यमानत्वम्' यथा ज्वालादेः । अतः फलसाधनत्वनिर्वाहाय साधनेन कर्मणा मध्ये साध्यमानमपूर्वं अवान्तरव्यापार इति न तेन व्यापारिणो यागस्य अन्यथासिद्धिः । अतः सिद्धमपूर्वम् ॥

इयं चापूर्वस्वीकारे प्रक्रिया—अधिकारविधिना हि फलसाधनत्वं धात्वर्थस्य यागस्य अवगतम् । कथं च विनश्वरस्य कर्मणः फलसाधनत्वमिति शंकायां अपूर्वं कृत्वा इत्युच्यते । कथमपूर्वं कर्तव्यमित्यपेक्षायां च अङ्गसाहित्येनेति । अतः पूर्वोक्ततरकालभाविभिः अङ्गव्यापारैः विषयीकृतस्य यागस्य अपूर्वसाधनत्वं, न स्वतः इति अपूर्वान्तरमपि स्वीकरणीयम् । तद्यत्र एकमेव प्रधानं तत्र प्रधानानुष्ठानानन्तरं एकं अपूर्वं जायते । यस्य हि उत्पत्त्यपूर्वमिति नाम । उत्तराङ्गजन्यापूर्वसहितेन तेन उत्पत्त्यपूर्वेण फलापूर्वं जायते । तस्यैव परमापूर्वमित्यपि नामधेयम् ॥

एवं यत्र प्रधानद्वयं, तत्र द्वाभ्यामपि प्रधानकर्मभ्यां उत्पत्त्यपूर्वद्वयम् । ताभ्यां चैकं परमापूर्वं इति त्रीण्यपूर्वाणि ज्ञेयानि । एवमेव प्रधानकर्मवृद्धौ अपूर्ववृद्धिः द्रष्टव्या ॥

दर्शपूर्णमासयोस्तु=विद्धद्वाक्याभ्यां समुदायद्वयस्यावगतत्वात् द्वे समुदायापूर्वे, प्रधानकर्मणां षण्णां विद्यमानत्वात् एकैकस्मादपि प्रधानात् एकैकमुत्पत्त्यपूर्वमिति षडुत्पत्त्यपूर्वाणि, परमापूर्वं च फलाव्यवहितमेकमिति नवानामपूर्वाणां सिद्धिः द्रष्टव्या । केचित्तु परमापूर्वं नैव स्वीकुर्वन्ति । उत्तराङ्गानामपि उत्पत्त्यपूर्वगतफलसाधनतोशक्तिस्थापने उपयोगः इति स्वीकारत् न तदर्थं च परमापूर्वकल्पनं इति वदन्ति । सर्वथा अपूर्वं सिद्धम् ॥

इदं चापूर्वं फलनाश्यमित्यङ्गीक्रियते । अत एव " धर्मः क्षरति कीर्तनात् ' इत्यादेरुपपत्तिः । एतेन क्रतुयागध्वंसस्यैवावान्तर व्यापारत्वं अस्तु, अलं अपूर्वकल्पनया इति शंकाऽपि परास्ता । ध्वंसस्य नित्यत्वेन नाशायोगात् कीर्तननाश्यत्वादिश्रवणविरोधात् । अङ्गध्वंसस्यापि सार्वदिकत्वात् विकृतौ अतिदेशानवसरात् । अतः अपूर्वकल्पनमेव ज्यायः । इदं च आपाततः मीमांसकमतमभिप्रेत्योक्तम् ।

वस्तुतस्तु ' इज्यते वारिणा नित्यं यः क ब्रह्मेति चोदितः ' इति ग्रहैकत्वाधिकरणवार्तिकपर्यालोचनायां, व्याकरणाधिकरण तन्त्रवार्तिकपर्यालोचनायां च ईश्वरसद्भावपक्षस्यैव वार्तिककाराभिप्रेतत्वात् ईश्वरानुग्रहस्यैव सत्कर्मानुष्ठानजन्यस्य फलहेतुतानिर्वाहकत्वं युक्तमिति औपनिषदसिद्धान्त एव " अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च " इत्यादि गीतावचनोपबृंहितः रमणीयः भाति । अतः अपूर्वद्वारा ईश्वरानुग्रहद्वारा वा यागादेः फलसाधनत्वसंभवात् धर्मः यागादिरिति सिद्धम् ॥

निषिद्धं तु कर्म कलञ्जभक्षणादिकमधर्मः । निषेधश्च ' न कलञ्जं भक्षयेत् ' ' न सुरां पिबेत् ' ' नानृतं वदेत् ' इत्यादि नञ् समभिव्याहृतलिङ्घटितवाक्यम् । नञः अभावे लिङः प्रवर्तना अर्थः । प्रवर्तनया च प्रवृत्त्यनुकूलव्यापाररूपया प्रवृत्त्यनुकूलत्वनिर्वृत्त्यै प्रवृत्ति विषययागादेरिष्टसाधनत्वमाक्षिप्यते इति पूर्वमेवावेदितम् ।

नञ्समभिव्याहारस्थले च नञा विरुद्धार्थबोधकेन प्रवर्तनाविरुद्धः निवर्तना लिङा बोध्यते। निवृत्त्यनुकूलव्यापारात्मिकया निवर्तनया निवृत्तिविषये निषेध्यकलञ्जभक्षणसुरापानादौ अनिष्टसाधनत्वमाक्षिप्यते। कलञ्जभक्षणादौ च रागतः प्रवृत्तिविषये अनिष्टसाधनताज्ञानात् निवृत्ति

भवति । निषेधवाक्ये च नञः प्रत्ययेन साकमेवान्वयः, प्रधानार्थ वाचित्वात् प्रत्ययस्य । तदैव च निवर्तमानात्मकवाक्यार्थसिद्धिः ।

यदा च तथा प्रधानान्वयस्वीकारे बाधकं, तदा अन्येन पदेन नञः अन्वयः इष्टः । तदानीं तादृशवाक्यस्य पर्युदासवाक्यमिति व्यवहारः । तच्च बाधकं द्विविधं, 'तस्य व्रतमित्युपक्रमः, विकल्प प्रसक्तिश्च । आद्यं यथा = स्नातकव्रतबोधकप्रकरणे 'तस्य व्रत' मित्युपक्रम्य श्रूयते 'नेक्षेतोद्यन्तमादित्यं नास्तम्यन्तं कदाचन' इति । अत्र यदि कलञ्जादिवाक्यवत् नञः लिङा अन्वय-मङ्गीकृत्य आदित्येक्षणादिकं निषिध्यते इत्युच्यते तर्हि 'व्रत' मिति कर्तव्यविषयकोपक्रमविरोधः, कर्तव्यपदार्थाबोधनात् । अतः तत्परि हाराय धातुना साकं नञः अन्वयं स्वीकृत्य अनीक्षणसंकल्पः आर्थ-वादिकपापक्षयपरिहाररूपफलोद्देशेन विधीयते । तदा तु संकल्प-रूपकर्तव्यपदार्थबोधनात् नोपक्रमविरोधः । प्रत्ययभिन्नपदेन साकं नञः अन्वयस्य स्वीकारात् अत्र पर्युदासत्वम् ॥

एवं 'यजतिषु ये यजामहं करोति, नानुयाजेषु' इत्यत्र 'नानुयाजेषु' इति न येयजामहः निषिध्यते, तथासति प्रतियोगि-भूतस्य येयजामहस्य अलौकिकतया शास्त्रेणैव प्राप्तेर्वक्तव्यत्वात् शास्त्र प्राप्तस्य शास्त्रेण निषेधे उभयोरपि तुल्यबलत्वेन विकल्पापत्तेः । न चेष्टापत्तिरिति वाच्यम् । विकल्पयस्य अष्टदोषदुष्टत्वात् । अतः अत्र नञः अनूयाजपदेन साकमन्वयमङ्गीकृत्य अनूयाजव्यतिरिक्तेषु ये यजामहः कार्यः इत्येव वाक्यार्थः । तदा च अनूयाजेषु ये यजामह मन्त्रप्राप्तेरभावात् न पूर्वोक्तदोषः इति एतादृशबाधकद्वयानुपलंभे सर्वत्र नञ्घटितवाक्येषु प्रतिषेधाश्रयणमेव। अतश्च विधिनिषेधात्मक शास्त्रपर्यालोचनेन अनिष्टसाधनाधर्मेभ्यः निवृत्ताः इष्टसाधकधर्मेषु

स्यादेतत्—कथं पुनः आशुविनाशिनः कर्मणः अपूर्वेण विना कालान्तरभाविकफलसाधनत्वं, अतः अपूर्वकल्पनमिति ।—नस्यात् अपूर्वे कल्पितेऽपि कथं यागसाधनत्वस्य श्रुतस्य निर्वाहः? अपूर्वं हि तदा फलसाधनं भवेत्, न यागः । अतः न अपूर्वकल्पनमुपपत्तिमत् ।

अथ स्यात्—अपूर्वं हि यागस्य शक्तिः अवान्तरव्यापारो वा इति स्वीक्रियते, अतः न विरोधः इति । नेदं युक्तं वा शक्तिमति व्यापारवति, अतीते शक्तिः व्यापारो वा वर्तते इत्यस्य लोके क्वाप्यदर्शनात् यागे नष्टे अपूर्वस्यापि नाशापत्तेः । अतः नष्टोऽपि याग एव फलं साधयति । अथवा फलपर्यन्तं वा याग एवावतिष्ठते इति शास्त्रप्रामाण्यादभ्युपगन्तव्यम् । एवं च न अपूर्वसिद्धिरिति चेन्न—स्वर्गसाधनत्वस्य श्रुतस्य अन्यथाऽनुपपत्त्या हि अपूर्वं परिकल्प्यते । यागस्य स्थैर्यं, विनष्टस्यापि फलसाधकत्वं इति तु लोकविरुद्धत्वादुपेक्ष्यमेव । अतः अपूर्वकल्पनमेवोपपत्तिमत् । न च तर्हि श्रुतयागसाधनत्वस्य विरोधः अपूर्वस्यैव तर्हि स्वर्गसाधनत्वापत्तेः इति वाच्यम् । यागस्य शक्तिः व्यापारो वा अपूर्वमिति स्वीकरणेन, शक्त्या शक्तिमतो, व्यापारेण व्यापारिणो वा अन्यथासिद्धेरसंभवात् । न हि चक्रभ्रमणेन दण्डव्यापारेण घटं प्रति दण्डस्यान्यथासिद्धिर्भवति । अतः न श्रुतयागनिष्ठ स्वर्गसाधनत्वस्य विरोधगन्धोऽपि ॥

ननूक्तं—यागे नष्टे शक्तिः व्यापारो वा अपूर्वं कथं स्थातुं शक्नुयात्? शक्तिमतः व्यापारवतो वा पदार्थस्याभावे शक्तेर्व्यापारस्य वा स्थानायोगात् इति—

सत्यमुक्तं, दुरुक्तं तत्—कार्यानुमेया हि शक्तिः यत्र स्थिता कार्यायालं तत्रैवानुमीयते । एवं च सुखानुभवस्य त्वन्यत्रोदयात्

यागशक्तिरप्यात्मन्येव वर्तते इत्यविरोधात् । अवान्तरव्यापारत्वं नाम 'समीहितोद्देशप्रवृत्तेन साधनेन तत्सिद्ध्यर्थमन्तरा साध्यमानत्वम्' यथा ज्वालादेः । अतः फलसाधनत्वनिर्वाहाय साधनेन कर्मणा मध्ये साध्यमानमपूर्वं अवान्तरव्यापार इति न तेन व्यापारिणो यागस्य अन्यथासिद्धिः । अतः सिद्धमपूर्वम् ॥

इयं चापूर्वस्वीकारे प्रक्रिया—अधिकारविधिना हि फलसाधनत्वं धात्वर्थस्य यागस्य अवगतम् । कथं च विनश्वरस्य कर्मणः फलसाधनत्वमिति शंकायां अपूर्वं कृत्वा इत्युच्यते । कथमपूर्वं कर्तव्यमित्यपेक्षायां च अङ्गसाहित्येनेति । अतः पूर्वोत्तरकालभाविभिः अङ्गव्यापारैः विषयीकृतस्य यागस्य अपूर्वसाधनत्वं, न स्वतः इति अपूर्वान्तरमपि स्वीकरणीयम् । तद्यत्र एकमेव प्रधानं तत्र प्रधानानुष्ठानानन्तरं एकं अपूर्वं जायते । यस्य हि उत्पत्त्यपूर्वमिति नाम । उत्तराङ्गजन्यापूर्वसहितेन तेन उत्पत्त्यपूर्वेण फलापूर्वं जायते । तस्यैव परमापूर्वमित्यपि नामधेयम् ॥

एवं यत्र प्रधानद्वयं, तत्र द्वाभ्यामपि प्रधानकर्मभ्यां उत्पत्त्यपूर्वद्वयम् । ताभ्यां चैकं परमापूर्वं इति त्रीण्यपूर्वाणि ज्ञेयानि । एवमेव प्रधानकर्मवृद्धौ अपूर्ववृद्धिः द्रष्टव्या ॥

दर्शपूर्णमासयोस्तु=विद्वद्वाक्याभ्यां समुदायद्वयस्यावगतत्वात् द्वे समुदायापूर्वे, प्रधानकर्मणां षण्णां विद्यमानत्वात् एकैकस्मादपि प्रधानात् एकैकमुत्पत्त्यपूर्वमिति षडुत्पत्त्यपूर्वाणि, परमापूर्वं च फलाव्यवहितमेकमिति नवानामपूर्वाणां सिद्धिः द्रष्टव्या । केचित्तु परमापूर्वं नैव स्वीकुर्वन्ति । उत्तराङ्गानामपि उत्पत्त्यपूर्वगतफलसाधनताशक्तिस्थापने उपयोगः इति स्वीकारात् न तदर्थं च परमापूर्वकल्पनं इति वदन्ति । सर्वथा अपूर्वं सिद्धम् ॥

इदं चापूर्वं फलनाश्यमित्यङ्गीक्रियते । अत एव 'धर्मः क्षरति कीर्तनात्' इत्यादेरुपपत्तिः । एतेन क्रतुयागध्वंसस्यैवावान्तरव्यापारत्वं अस्तु, अलं अपूर्वकल्पनया इति शङ्काऽपि परास्ता । ध्वंसस्य नित्यत्वेन नाशायोगात् कीर्तननाश्यत्वादिश्रवणविरोधात् । अङ्गध्वंसस्यापि सार्वदिकत्वात् विकृतौ अतिदेशानवसरात् । अतः अपूर्वकल्पनमेव ज्यायः । इदं च आपाततः मीमांसकमतमभिप्रेत्योक्तम् ।

वस्तुतस्तु 'इज्यते वारिणा नित्यं यः कं ब्रह्मेति चोदितः' इति ग्रहैकत्वाधिकरणवार्तिकपर्यालोचनायां, व्याकरणाधिकरणतन्त्रवार्तिकपर्यालोचनायां च ईश्वरसद्भावपक्षस्यैव वार्तिककाराभिमतत्वात् ईश्वरानुग्रहस्यैव सत्कर्मानुष्ठानजन्यस्य फलहेतुतानिर्वाहकत्वं युक्तमिति औपनिषदसिद्धान्त एव "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इत्यादि गीतावचनोपबृंहितः रमणीयः भाति । अतः अपूर्वद्वारा ईश्वरानुग्रहद्वारा वा यागादेः फलसाधनत्वसंभवात् धर्मः यागादिरिति सिद्धम् ॥

निषिद्धं तु कर्म कलञ्जभक्षणादिकमधर्मः । निषेधश्च 'न कलञ्जं भक्षयेत्' 'न सुरां पिबेत्' 'नानृतं वदेत्' इत्यादि नञ्समभिव्याहृतलिङ्घटितवाक्यम् । नञः अभावे लिङः प्रवर्तना अर्थः । प्रवर्तनया च प्रवृत्त्यनुकूलव्यापाररूपया प्रवृत्त्यनुकूलत्वनिर्वृत्त्यै प्रवृत्तिविषययागादेरिष्टसाधनत्वमाक्षिप्यते इति पूर्वमेवावेदितम् ।

नञ्समभिव्याहारस्थले च नञा विरुद्धार्थबोधकेन प्रवर्तनाविरुद्धा निवर्तना लिङा बोध्यते । निवृत्त्यनुकूलव्यापारात्मिकया निवर्तनया निवृत्तिविषये निषेध्यकलञ्जभक्षणसुरापानादौ अनिष्टसाधनत्वमाक्षिप्यते । कलञ्जभक्षणादौ च रागतः प्रवृत्तिविषये अनिष्टसाधनताज्ञानात् निवृत्ति

भवति । निषेधवाक्ये च नञः प्रत्ययेन साकमेवान्वयः, प्रधानार्थ वाचित्वात् प्रत्ययस्य । तदैव च निवर्तमानात्मकवाक्यार्थसिद्धिः ।

यदा च तथा प्रधानान्वयस्वीकारे बाधकं, तदा अन्येन पदेन नञः अन्वयः इष्टः । तदानीं तादृशवाक्यस्य पर्युदासवाक्यमिति व्यवहारः । तच्च बाधकं द्विविधं, 'तस्य व्रतमित्युपक्रमः, विकल्प प्रसक्तिश्च । आद्यं यथा=स्नातकव्रतबोधकप्रकरणे 'तस्य व्रत' मित्युपक्रम्य श्रूयते 'नेक्षेतोद्यन्तमादित्यं नास्तम्यन्तं कदाचन' इति । अत्र यदि कलञ्जादिवाक्यवत् नञः लिङा अन्वय-मङ्गीकृत्य आदित्येक्षणादिकं निषिध्यते इत्युच्यते तर्हि 'व्रत' मिति कर्तव्यविषयकोपक्रमविरोधः, कर्तव्यपदार्थाबोधनात् । अतः तत्परि हाराय धातुना साकं नञः अन्वयं स्वीकृत्य अनीक्षणसंकल्पः आर्थ-वादिकपापक्षयपरिहाररूपफलोद्देशेन विधीयते । तदा तु संकल्प-रूपकर्तव्यपदार्थबोधनात् नोपक्रमविरोधः । प्रत्ययभिन्नपदेन साकं नञः अन्वयस्य स्वीकारात् अत्र पर्युदासत्वम् ॥

एवं 'यजतिषु ये यजामहं करोति, नानुयाजेषु' इत्यत्र 'नानुयाजेषु' इति न येयजामहः निषिध्यते, तथासति प्रतियोगि-भूतस्य येयजामहस्य अलौकिकतया शास्त्रेणैव प्राप्तेर्वक्तव्यत्वात् शास्त्र प्राप्तस्य शास्त्रेण निषेधे उभयोरपि तुल्यबलत्वेन विकल्पापत्तेः । न चेष्टापत्तिरिति वाच्यम् । विकल्पयस्य अष्टदोषदुष्टत्वात् । अतः अत्र नञः अनूयाजपदेन साकमन्वयमङ्गीकृत्य अनूयाजव्यतिरिक्तेषु ये यजामहः कार्यः इत्येव वाक्यार्थः । तदा च अनूयाजेषु ये यजामह मन्त्रप्राप्तेरभावात् न पूर्वोक्तदोषः इति एतादृशबाधकद्वयानुपलंभे सर्वत्र नञ्घटितवाक्येषु प्रतिषेधाश्रयणमेव । अतश्च विधिनिषेधात्मक शास्त्रपर्यालोचनेन अनिष्टसाधनाधर्मेभ्यः निवृत्ताः इष्टसाधकधर्मेषु